# 8 Shrimaddevibhagavatamahapurane Ashtamah Skandhah

# ૮ શ્રીમદ્દેવીભાગવતમહાપુરાણે અષ્ટમઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 08

File name : devIbhAgavatam08.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૮ શ્રીમદ્દેવીભાગવતમહાપુરાણે અષ્ટમઃ સ્કન્ધઃ

## ૮.૧ પ્રથમોઽધ્યાયઃ । ભુવનકોશપ્રસઙ્ગે દેવ્યા મનવે વરદાનવર્ણનમ્ ।

જનમેજય ઉવાચ ।
સૂર્યચન્દ્રાન્વયોત્થાનાં નૃપાણાં સત્કથાશ્રિતમ્ ।
ચરિતં ભવતા પ્રોક્તં શ્રુતં તદમૃતાસ્પદમ્ ॥ ૧॥

અધુના શ્રોતુમિચ્છામિ સા દેવી જગદમ્બિકા ।
મન્વન્તરેષુ સર્વેષુ યદ્યદ્રૂપેણ પૂજ્યતે ॥ ૨॥

યસ્મિન્યસ્મિંશ્ચ વૈ સ્થાને યેન યેન ચ કર્મણા ।
(શરીરેણ ચ દેવેશી પૂજનીયા ફલપ્રદા ।
યેનૈવ મન્ત્રબીજેન યત્ર યત્ર ચ પૂજ્યતે ॥)
દેવ્યા વિરાટ્સ્વરૂપસ્ય વર્ણનં ચ યથાતથમ્ ॥ ૩॥

યેન ધ્યાનેન તત્સૂક્ષ્મે સ્વરૂપે સ્યાન્મતેર્ગતિઃ ।
તત્સર્વં વદ વિપ્રર્ષે યેન શ્રેયોઽહમાપ્નુયામ્ ॥ ૪॥

વ્યાસ ઉવાચ ।
શ ૃણુ રાજન્ પ્રવક્ષ્યામિ દેવ્યારાધનમુત્તમમ્ ।
યત્કૃતેન શ્રુતેનાપિ નરઃ શ્રેયોઽત્ર વિન્દતે ॥ ૫॥

એવમેતન્નારદેન પૃષ્ટો નારાયણઃ પુરા ।
તસ્મૈ યદુક્તવાન્દેવો યોગચર્યાપ્રવર્તકઃ ॥ ૬॥

એકદા નારદઃ શ્રીમાન્પર્યટન્પૃથિવીમિમામ્ ।
નારાયણાશ્રમં પ્રાપ્તો ગતખેદશ્ચ તસ્થિવાન્ ॥ ૭॥

તસ્મૈ યોગાત્મને નત્વા બ્રહ્મદેવતનૂદ્ભવઃ ।
પર્યપૃચ્છદિમં ચાર્થં યત્પૃષ્ટો ભવતાનઘ ॥ ૮॥

નારદ ઉવાચ ।

દેવદેવ મહાદેવ પુરાણપુરુષોત્તમ ।
જગદાધાર સર્વજ્ઞ શ્લાઘનીયોરુસદ્ગુણ ॥ ૯॥

જગતસ્તત્ત્વમાદ્યં યત્તન્મે વદ યથેપ્સિતમ્ ।
જાયતે કુત એવેદં કુતશ્ચેદં પ્રતિષ્ઠિતમ્ ॥ ૧૦॥

કુતોઽન્તં પ્રાપ્નુયાત્કાલે કુત્ર સર્વફલોદયઃ ।
કેન જ્ઞાતેન માયૈષા મોહભૂર્નાશમાપ્નુયાત્ ॥ ૧૧॥

કયાર્ચયા કિં જપેન કિં ધ્યાનેનાત્મહૃત્કજે ।
પ્રકાશો જાયતે દેવ તમસ્યર્કોદયો યથા ॥ ૧૨॥

એતત્પ્રશ્નોત્તરં દેવ બ્રૂહિ સર્વમશેષતઃ ।
યથા લોકસ્તરેદન્ધતમસં ત્વઞ્જસૈવ હિ ॥ ૧૩॥

વ્યાસ ઉવાચ ।
એવં દેવર્ષિણા પૃષ્ટઃ પ્રાચીનો મુનિસત્તમઃ ।
નારાયણો મહાયોગી પ્રતિનન્દ્ય વચોઽબ્રવીત્ ॥ ૧૪॥

શ્રીનારાયણ ઉવાચ ।
શ઼ૃણુ દેવર્ષિવર્યાત્ર જગતસ્તત્ત્વમુત્તમમ્ ।
યેન જ્ઞાતેન મર્ત્યો હિ જાયતે ન જગદ્ભ્રમે ॥ ૧૫॥

જગતસ્તત્ત્વમિત્યેવ દેવી પ્રોક્તા મયાપિ હિ ।
ઋષિભિર્દેવગન્ધર્વૈરન્યૈશ્ચાપિ મનીષિભિઃ ॥ ૧૬॥

સા જગત્સૃજતે દેવી તયા ચ પ્રતિપાલ્યતે ।
તયા ચ નાશ્યતે સર્વમિતિ પ્રોક્તં ગુણત્રયાત્ ॥ ૧૭॥

તસ્યાઃ સ્વરૂપં વક્ષ્યામિ દેવ્યાઃ સિદ્ધર્ષિપૂજિતમ્ ।
સ્મરતાં સર્વપાપઘ્નં કામદં મોક્ષદં તથા ॥ ૧૮॥

મનુઃ સ્વાયમ્ભુવસ્ત્વાદ્યઃ પદ્મપુત્રઃ પ્રતાપવાન્ ।
શતરૂપાપતિઃ શ્રીમાન્સર્વમન્વન્તરાધિપઃ ॥ ૧૯॥

સ મનુઃ પિતરં દેવં પ્રજાપતિમકલ્મષમ્ ।
ભક્ત્યા પર્યચરત્પૂર્વં તમુવાચાત્મભૂઃ સુતમ્ ॥ ૨૦॥

પુત્ર પુત્ર ત્વયા કાર્યં દેવ્યારાધનમુત્તમમ્ ।
તત્પ્રસાદેન તે તાત પ્રજાસર્ગઃ પ્રસિદ્ધ્યતિ ॥ ૨૧॥

એવમુક્તઃ પ્રજાસ્રષ્ટ્રા મનુઃ સ્વાયમ્ભુવો વિરાટ્ ।
જગદ્યોનિં તદા દેવીં તપસાતર્પયદ્ વિભુઃ ॥ ૨૨॥

તુષ્ટાવ દેવીં દેવેશીં સમાહિતમતિઃ કિલ ।
આદ્યાં માયાં સર્વશક્તિં સર્વકારણકારણામ્ ॥ ૨૩॥

મનુરુવાચ ।
નમો નમસ્તે દેવેશિ જગત્કારણકારણે ।
શઙ્ખચક્રગદાહસ્તે નારાયણહૃદાશ્રિતે ॥ ૨૪॥

વેદમૂર્ત્તે જગન્માતઃ કારણસ્થાનરૂપિણિ ।
વેદત્રયપ્રમાણજ્ઞે સર્વદેવનુતે શિવે ॥ ૨૫॥

માહેશ્વરિ મહાભાગે મહામાયે મહોદયે ।
મહાદેવપ્રિયાવાસે મહાદેવપ્રિયઙ્કરિ ॥ ૨૬॥

ગોપેન્દ્રસ્ય પ્રિયે જ્યેષ્ઠે મહાનન્દે મહોત્સવે ।
મહામારીભયહરે નમો દેવાદિપૂજિતે ॥ ૨૭॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુ તે ॥ ૨૮॥

યતશ્ચેદં યયા વિશ્વમોતં પ્રોતં ચ સર્વદા ।
ચૈતન્યમેકમાદ્યન્તરહિતં તેજસાં નિધિમ્ ॥ ૨૯॥

બ્રહ્મા યદીક્ષણાત્સર્વં કરોતિ ચ હરિઃ સદા ।
પાલયત્યપિ વિશ્વેશઃ સંહર્તા યદનુગ્રહાત્ ॥ ૩૦॥

મધુકૈટભસમ્ભૂતભયાર્તઃ પદ્મસમ્ભવઃ ।
યસ્યાઃ સ્તવેન મુમુચે ઘોરદૈત્યભવામ્બુધેઃ ॥ ૩૧॥

ત્વં હ્રીઃ કીર્તિઃ સ્મૃતિઃ કાન્તિઃ કમલા ગિરિજા સતી ।
દાક્ષાયણી વેદગર્ભા સિદ્ધિદાત્રી સદાભયા ॥ ૩૨॥

સ્તોષ્યે ત્વાં ચ નમસ્યામિ પૂજયામિ જપામિ ચ ।
ધ્યાયામિ ભાવયે વીક્ષે શ્રોષ્યે દેવિ પ્રસીદ મે ॥ ૩૩॥

બ્રહ્મા વેદનિધિઃ કૃષ્ણો લક્ષ્યાવાસઃ પુરન્દરઃ ।
ત્રિલોકાધિપતિઃ પાશી યાદસામ્પતિરુત્તમઃ ॥ ૩૪॥

કુબેરો નિધિનાથોઽભૂદ્યમો જાતઃ પરેતરાટ્ ।

નૈરૃતો રક્ષસાં નાથઃ સોમો જાતો હ્યપોમયઃ ॥ ૩૫॥

ત્રિલોકવન્દ્યે લોકેશિ મહામાઙ્ગલ્યરૂપિણિ ।
નમસ્તેઽસ્તુ પુનર્ભૂયો જગન્માતર્નમો નમઃ ॥ ૩૬॥

શ્રીનારાયણ ઉવાચ ।
એવં સ્તુતા ભગવતી દુર્ગા નારાયણી પરા ।
પ્રસન્ના પ્રાહ દેવર્ષે બ્રહ્મપુત્રમિદં વચઃ ॥ ૩૭॥

દેવ્યુવાચ ।
વરં વરય રાજેન્દ્ર બ્રહ્મપુત્ર યદિચ્છસિ ।
પ્રસન્નાહં સ્તવેનાત્ર ભક્ત્યા ચારાધનેન ચ ॥ ૩૮॥

મનુરુવાચ ।
યદિ દેવિ પ્રસન્નાસિ ભક્ત્યા કારુણિકોત્તમે ।
તદા નિર્વિઘ્નતઃ સૃષ્ટિઃ પ્રજાયાઃ સ્યાત્તવાજ્ઞયા ॥ ૩૯॥

દેવ્યુવાચ ।
પ્રજાસર્ગઃ પ્રભવતુ મમાનુગ્રહતઃ કિલ ।
નિર્વિઘ્નેન ચ રાજેન્દ્ર વૃદ્ધિશ્ચાપ્યુત્તરોત્તરમ્ ॥ ૪૦॥

યઃ કશ્ચિત્પઠતે સ્તોત્રં મદ્ભક્ત્યા ત્વત્કૃતં સદા ।
તેષાં વિદ્યા પ્રજાસિદ્ધિઃ કીર્તિઃ કાન્ત્યુદયઃ ખલુ ॥ ૪૧॥

જાયન્તે ધનધાન્યાનિ શક્તિરપ્રહતા નૃણામ્ ।
સર્વત્ર વિજયો રાજન્ સુખં શત્રુપરિક્ષયઃ ॥ ૪૨॥

શ્રીનારાયણ ઉવાચ ।
એવં દત્ત્વા વરાન્ દેવી મનવે બ્રહ્મસૂનવે ।
અન્તર્ધાનં ગતા ચાસીત્પશ્યતસ્તસ્ય ધીમતઃ ॥ ૪૩॥

અથ લબ્ધવરો રાજા બ્રહ્મપુત્રઃ પ્રતાપવાન્ ।
બ્રહ્માણમબ્રવીત્તાત સ્થાનં મે દીયતાં રહઃ ॥ ૪૪॥

યત્રાહં સમધિષ્ઠાય પ્રજાઃ સ્રક્ષ્યામિ પુષ્કલાઃ ।
યક્ષ્યામિ યજ્ઞૈર્દેવેશં તત્સમાદિશ માચિરમ્ ॥ ૪૫॥

ઇતિ પુત્રવચઃ શ્રુત્વા પ્રજાપતિપતિર્વિભુઃ ।
ચિન્તયામાસ સુચિરં કથં કાર્યં ભવેદિદમ્ ॥ ૪૬॥

સૃજતો મે ગતઃ કાલો વિપુલોઽનન્તસઙ્ખ્યકઃ ।
ધરા વાર્ભિઃ સ્તુતા મગ્ના રસં યાતાખિલાશ્રયા ॥ ૪૭॥

ઇદં મચ્ચિન્તિતં કાર્યં ભગવાનાદિપૂરુષઃ ।
કરિષ્યતિ સહાયો મે યદાદેશેઽહમાશ્રિતઃ ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામષ્ટમસ્કન્ધે ભુવનકોશપ્રસઙ્ગે
દેવ્યા મનવે વરદાનવર્ણનં નામ પ્રધમોઽધ્યાયઃ ॥ ૮.૧॥

## ૮.૨ દ્વિતીયોઽધ્યાયઃ । ધરણ્યુદ્ધારવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
એવં મીમાંસતસ્તસ્ય પદ્મયોનેઃ પરન્તપ ।
મન્વાદિભિર્મુનિવરૈર્મરીચ્યાદ્યૈઃ સમન્તતઃ ॥ ૧॥

ધ્યાયતસ્તસ્ય નાસાગ્રાદ્વિરઞ્ચેઃ સહસાનઘ ।
વરાહપોતો નિરગાદેકાઙ્ગુલપ્રમાણતઃ ॥ ૨॥

તસ્યૈવ પશ્યતઃ ખસ્થઃ ક્ષણેન કિલ નારદ ।
કરિમાત્રં પ્રવવૃધે તદદ્ભુતતમં હ્યભૂત્ ॥ ૩॥

મરીચિમુખ્યૈર્વિપ્રેન્દ્રૈઃ સનકાદ્યૈશ્ચ નારદ ।
તદ્ દૃષ્ટ્વા સૌકરં રૂપં તર્કયામાસ પદ્મભૂઃ ॥ ૪॥

કિમેતત્સૌકરવ્યાજં દિવ્યં સત્ત્વમવસ્થિતમ્ ।
અત્યાશ્ચર્યમિદં જાતં નાસિકાયા વિનિઃસૃતમ્ ॥ ૫॥

દૃષ્ટોઽઙ્ગુષ્ઠશિરોમાત્રઃ ક્ષણાચ્છૈલેન્દ્રસન્નિભઃ ।
આહોસ્વિદ્ભગવાન્કિં વા યજ્ઞો મે ખેદયન્મનઃ ॥ ૬॥

ઇતિ તર્કયતસ્તસ્ય બ્રહ્મણઃ પરમાત્મનઃ ।
વરાહરૂપો ભગવાઞ્જગર્જાચલસન્નિભઃ ॥ ૭॥

વિરઞ્ચિં હર્ષયામાસ સંહતાંશ્ચ દ્વિજોત્તમાન્ ।
સ્વગર્જશબ્દમાત્રેણ દિક્પ્રાન્તમનુનાદયન્ ॥ ૮॥

તે નિશમ્ય સ્વખેદસ્ય ક્ષયિતું ઘુર્ઘુરસ્વનમ્ ।
જનસ્તપઃસત્યલોકવાસિનોઽમરવર્યકાઃ ॥ ૯॥

છન્દોમયૈઃ સ્તોત્રવરૈરૃક્સામાથર્વસમ્ભવૈઃ ।
વચોભિઃ પુરુષં ત્વાદ્યં દ્વિજેન્દ્રાઃ પર્યવાકિરન્ ॥ ૧૦॥

તેષાં સ્તોત્રં નિશમ્યાદ્યો ભગવાન્ હરિરીશ્વરઃ ।
કૃપાવલોકમાત્રેણાનુગૃહીત્વાઽપ આવિશત્ ॥ ૧૧॥

તસ્યાન્તર્વિશતઃ ક્રૂરસટાઘાતપ્રપીડિતઃ ।
સમુદ્રોઽથાબ્રવીદ્દેવ રક્ષ માં શરણાર્તિહન્ ॥ ૧૨॥

ઇત્યાકર્ણ્ય સમુદ્રોક્તં વચનં હરિરીશ્વરઃ ।
વિદારયઞ્જલચરાઞ્જગામાન્તર્જલે વિભુઃ ॥ ૧૩॥

ઇતસ્તતોઽભિધાવન્સન્ વિચિન્વન્પૃથિવીં ધરામ્ ।
આઘ્રાયાઘ્રાય સર્વેશો ધરામાસાદયચ્છનૈઃ ॥ ૧૪॥

અન્તર્જલગતાં ભૂમિં સર્વસત્ત્વાશ્રયાં તદા ।
ભૂમિં સ દેવદેવેશો દંષ્ટ્રયોદાજહાર તામ્ ॥ ૧૫॥

તાં સમુદ્ધૃત્ય દંષ્ટ્રાગ્રે યજ્ઞેશો યજ્ઞપૂરુષઃ ।
શુશુભે દિગ્ગજો યદ્વદુદ્ધૃત્યાથ સુપદ્મીનીમ્ ॥ ૧૬॥

તં દૃષ્ટ્વા દેવદેવેશો વિરઞ્ચિઃ સમનુઃ સ્વરાટ્ ।
તુષ્ટાવ વાગ્ભિર્દેવેશં દંષ્ટ્રોદ્ધતવસુન્ધરમ્ ॥ ૧૭॥

બ્રહ્મોવાચ ।
જિતં તે પુણ્ડરીકાક્ષ ભક્તાનામાર્તિનાશન ।
ખર્વીકૃતસુરાધાર સર્વકામફલપ્રદ ॥ ૧૮॥

ઇયં ચ ધરણી દેવ શોભતે વસુધા તવ ।
પદ્મિનીવ સુપત્રાઢ્યા મતઙ્ગજકરોદ્ધૃતા ॥ ૧૯॥

ઇદં ચ તે શરીરં વૈ શોભતે ભૂમિસઙ્ગમાત્ ।
ઉદ્ધૃતામ્બુજશુણ્ડાગ્રકરીન્દ્રતનુસન્નિભમ્ ॥ ૨૦॥

નમો નમસ્તે દેવેશ સૃષ્ટિસંહારકારક ।
દાનવાનાં વિનાશાય કૃતનાનાકૃતે પ્રભો ॥ ૨૧॥

અગ્રતશ્ચ નમસ્તેઽસ્તુ પૃષ્ઠતશ્ચ નમો નમઃ ।
સર્વામરાધારભૂત બૃહદ્ધામ નમોઽસ્તુ તે ॥ ૨૨॥

ત્વયાહં ચ પ્રજાસર્ગે નિયુક્તઃ શક્તિબૃંહિતઃ ।

ત્વદાજ્ઞાવશતઃ સર્ગં કરોમિ વિકરોમિ ચ ॥ ૨૩॥

ત્વત્સહાયેન દેવેશા અમરાશ્ચ પુરા હરે ।
સુધાં વિભેજિરે સર્વે યથાકાલં યથાબલમ્ ॥ ૨૪॥

ઇન્દ્રસ્ત્રિલોકીસામ્રાજ્યં લબ્ધવાંસ્તન્નિદેશતઃ ।
ભુનક્તિ લક્ષ્મીં બહુલાં સુરસઙ્ઘપ્રપૂજિતઃ ॥ ૨૫॥

વહ્નિઃ પાવકતાં લબ્ધ્વા જાઠરાદિવિભેદતઃ ।
દેવાસુરમનુષ્યાણાં કરોત્યાપ્યાયનં તથા ॥ ૨૬॥

ધર્મરાજોઽથ પિતૃણામધિપઃ સર્વકર્મદૃક્ ।
કર્મણાં ફલદાતાસૌ ત્વન્નિયોગાદધીશ્વરઃ ॥ ૨૭॥

નૈરૃતો રક્ષસામીશો યક્ષો વિઘ્નવિનાશનઃ ।
સર્વેષાં પ્રાણિનાં કર્મસાક્ષી ત્વત્તઃ પ્રજાયતે ॥ ૨૮॥

વરુણો યાદસામીશો લોકપાલો જલાધિપઃ ।
ત્વદાજ્ઞાબલમાશ્રિત્ય લોકપાલત્વમાગતઃ ॥ ૨૯॥

વાયુર્ગન્ધવહઃ સર્વભૂતપ્રાણનકારણમ્ ।
જાતસ્તવ નિદેશેન લોકપાલો જગદ્ગુરુઃ ॥ ૩૦॥

કુબેરઃ કિન્નરાદીનાં યક્ષાણાં જીવનાશ્રયઃ ।
ત્વદાજ્ઞાન્તર્ગતઃ સર્વલોકપેષુ ચ માન્યભૂઃ ॥ ૩૧॥

ઈશાનઃ સર્વરુદ્રાણામીશ્વરાન્તકરઃ પ્રભુઃ ।
જાતો લોકેશવન્દ્યોઽસૌ સર્વદેવાધિપાલકઃ ॥ ૩૨॥

નમસ્તુભ્યં ભગવતે જગદીશાય કુર્મહે ।
યસ્યાંશભાગાઃ સર્વે હિ જાતા દેવાઃ સહસ્રશઃ ॥ ૩૩॥

નારદ ઉવાચ ।
એવં સ્તુતો વિશ્વસૃજા ભગવાનાદિપૂરુષઃ ।
લીલાવલોકમાત્રેણાપ્યનુગ્રહમવાસૃજત્ ॥ ૩૪॥

તત્રૈવાભ્યાગતં દૈત્યં હિરણ્યાક્ષં મહાસુરમ્ ।
રુન્ધાનમધ્વનો ભીમં ગદયાતાડયદ્ધરિઃ ॥ ૩૫॥

તદ્રક્તપઙ્કદિગ્ધાઙ્ગો ભગવાનાદિપૂરુષઃ ।
ઉદ્ધૃત્ય ધરણીં દેવો દંષ્ટ્રયા લીલયાપ્સુ તામ્ ॥ ૩૬॥

નિવેશ્ય લોકનાથેશો જગામ સ્થાનમાત્મનઃ ।
એતદ્ભગવતશ્ચિત્રં ધરણ્યુદ્ધરણં પરમ્ ॥ ૩૭॥

શ‍ૃણુયાદ્યઃ પુમાન્ યશ્ચ પઠેચ્ચરિતમુત્તમમ્ ।
સર્વપાપવિનિર્મુક્તો વૈષ્ણવીં ગતિમાપ્નુયાત્ ॥ ૩૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામષ્ટમસ્કન્ધે ધરણ્યુદ્ધારવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૮.૨॥

## ૮.3 તૃતીયોઽધ્યાયઃ । ભુવનકોશવિસ્તારે સ્વાયમ્ભુવમનુવંશકીર્તનમ્ ।

શ્રીનારાયણ ઉવાચ ।
મહીં દેવઃ પ્રતિષ્ઠાપ્ય યથાસ્થાને ચ નારદ ।
વૈકુણ્ઠલોકમગમદ્ બ્રહ્મોવાચ સ્વમાત્મજમ્ ॥ ૧॥

સ્વાયમ્ભૂવ મહાબાહો પુત્ર તેજસ્વિનાંવર ।
સ્થાને મહીમયે તિષ્ઠ પ્રજાઃ સૃજ યથોચિતમ્ ॥ ૨॥

દેશકાલવિભાગેન યજ્ઞેશં પુરુષં યજ ।
ઉચ્ચાવચપદાર્થૈશ્ચ યજ્ઞસાધનકૈર્વિભો ॥ ૩॥

ધર્મમાચર શાસ્ત્રોક્તં વર્ણાશ્રમનિબન્ધનમ્ ।
એતેન ક્રમયોગેન પ્રજાવૃદ્ધિર્ભવિષ્યતિ ॥ ૪॥

પુત્રાનુત્પાદ્ય ગુણતઃ કીર્ત્યા કાન્ત્યાત્મરૂપિણઃ ।
વિદ્યાવિનયસમ્પન્નાન્ સદાચારવતાં વરાન્ ॥ ૫॥

કન્યાશ્ચ દત્ત્વા ગુણવદ્યશોવદ્ભ્યઃ સમાહિતઃ ।
મનઃ સમ્યક્ સમાધાય પ્રધાનપુરુષે પરે ॥ ૬॥

ભક્તિસાધનયોગેન ભગવત્પરિચર્યયા ।
ગતિમિષ્ટાં સદા વન્દ્યાં યોગિનાં ગમિતા ભવાન્ ॥ ૭॥

ઇત્યાશ્વાસ્ય મનું પુત્ર પદ્મયોનિઃ પ્રજાપતિઃ ।
પ્રજાસર્ગે નિયમ્યામું સ્વધામ પ્રત્યપદ્યત ॥ ૮॥

પ્રજાઃ સૃજત પુત્રેતિ પિતુરાજ્ઞાં સમાદધત્ ।
સ્વાયમ્ભુવઃ પ્રજાસર્ગમકરોત્પૃથિવીપતિઃ ॥ ૯॥

પ્રિયવ્રતોત્તાનપાદૌ મનુપુત્રૌ મહૌજસૌ ।
કન્યાસ્તિસ્રઃ પ્રસૂતાશ્ચ તાસાં નામાનિ મે શ‍ૃણુ ॥ ૧૦
આકૂતિઃ પ્રથમા કન્યા દ્વિતીયા દેવહૂતિકા ।
તૃતીયા ચ પ્રસૂતિર્હિ વિખ્યાતા લોકપાવની ॥ ૧૧
આકૂતિં રુચયે પ્રાદાત્કર્દમાય ચ મધ્યમામ્ ।
દક્ષાયાદાત્પ્રસૂતિં ચ યાસાં લોક ઇમાઃ પ્રજાઃ ॥ ૧૨
રુચેઃ પ્રજજ્ઞે ભગવાન્ યજ્ઞો નામાદિપૂરુષઃ ।
આકૂત્યાં દેવહૂત્યાં ચ કપિલોઽસૌ ચ કર્દમાત્ ॥ ૧૩
સાઙ્ખ્યાચાર્યઃ સર્વલોકે વિખ્યાતઃ કપિલો વિભુઃ ।
દક્ષાત્પ્રસૂત્યાં કન્યાશ્ચ બહુશો જજ્ઞિરે પ્રજાઃ ॥ ૧૪
યાસાં સન્તાનસમ્ભૂતા દેવતિર્યઙ્નરાદયઃ ।
પ્રસૂતા લોકવિખ્યાતા સર્વે સર્ગપ્રવર્તકાઃ ॥ ૧૫
યજ્ઞશ્ચ ભગવાન્ સ્વાયમ્ભુવમન્વન્તરે વિભુઃ ।
મનું રરક્ષ રક્ષોભ્યો યામૈર્દેવગણૈર્વૃતઃ ॥ ૧૬
કપિલોઽપિ મહાયોગી ભગવાન્ સ્વાશ્રમે સ્થિતઃ ।
દેવહૂત્યૈ પરં જ્ઞાનં સર્વાવિદ્યાનિવર્તકમ્ ॥ ૧૭
સવિશેષં ધ્યાનયોગમધ્યાત્મજ્ઞાનનિશ્ચયમ્ ।
કાપિલં શાસ્ત્રમાખ્યાતં સર્વાજ્ઞાનવિનાશનમ્ ॥ ૧૮
ઉપદિશ્ય મહાયોગી સ યયૌ પુલહાશ્રમમ્ ।
અદ્યાપિ વર્તતે દેવઃ સાઙ્ખ્યાચાર્યો મહાશયઃ ॥ ૧૯
યન્નામસ્મરણેનાપિ સાઙ્ખ્યયોગશ્ચ સિદ્ધ્યતિ ।
તં વન્દે કપિલં યોગાચાર્યં સર્વવરપ્રદમ્ ॥ ૨૦
એવમુક્તં મનોઃ કન્યાવંશવર્ણનમુત્તમમ્ ।
પઠતાં શ‍ૃણ્વતાં ચાપિ સર્વપાપવિનાશનમ્ ॥ ૨૧
અતઃ પરં પ્રવક્ષ્યામિ મનુપુત્રાન્વયં શુભમ્ ।
યદાકર્ણનમાત્રેણ પરં પદમવાપ્નુયાત્ ॥ ૨૨
દ્વીપવર્ષસમુદ્રાદિવ્યવસ્થા યત્સુતૈઃ કૃતા ।
વ્યવહારપ્રસિદ્ધ્યર્થં સર્વભૂતસુખાપ્તયે ॥ ૨૩

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવિસ્તારે સ્વાયમ્ભુવમનુવંશકીર્તનં નામ તૃતીયોઽધ્યાયઃ ॥ ૮.૩॥

## ચતુઽર્થોઽધ્યાયઃ । ભુવનકોશવિષયે પ્રિયવ્રતવંશવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
મનોઃ સ્વાયમ્ભુવસ્યાસીજ્જ્યેષ્ઠઃ પુત્રઃ પ્રિયવ્રતઃ ।
પિતુઃ સેવાપરો નિત્યં સત્યધર્મપરાયણઃ ॥ ૧॥

પ્રજાપતેર્દુહિતરં સુરૂપાં વિશ્વકર્મણઃ ।
બર્હિષ્મતીં ચોપયેમે સમાનાં શીલકર્મભિઃ ॥ ૨॥

તસ્યાં પુત્રાન્દશ ગુણૈરન્વિતાન્ભાવિતાત્મનઃ ।
જનયામાસ કન્યાં ચોર્જસ્વતીં ચ યવીયસીમ્ ॥ ૩॥

આગ્નીધ્રશ્ચેધ્મજિહ્વશ્ચ યજ્ઞબાહુસ્તૃતીયકઃ ।
મહાવીરશ્ચતુર્થસ્તુ પઞ્ચમો રુક્મશુક્રકઃ ॥ ૪॥

ઘૃતપૃષ્ઠશ્ચ સવનો મેધાતિથિરથાષ્ટમઃ ।
વીતિહોત્રઃ કવિશ્ચેતિ દશૈતે વહ્નિનામકાઃ ॥ ૫॥

એતેષાં દશપુત્રાણાં ત્રયોઽપ્યાસન્વિરાગિણઃ ।
કવિશ્ચ સવનશ્ચૈવ મહાવીર ઇતિ ત્રયઃ ॥ ૬॥

આત્મવિદ્યાપરિષ્ણાતાઃ સર્વે તે હ્યૂર્ધ્વરેતસઃ ।
આશ્રમે પરહંસાખ્યે નિઃસ્પૃહા હ્યભવન્મુદાઃ ॥ ૭॥

અપરસ્યાં ચ જાયાયાં ત્રયઃ પુત્રાશ્ચ જજ્ઞિરે ।
ઉત્તમસ્તામસશ્ચૈવ રૈવતશ્ચેતિ વિશ્રુતાઃ ॥ ૮॥

મન્વન્તરાધિપતય એતે પુત્રા મહૌજસઃ ।
પ્રિયવ્રતઃ સ રાજેન્દ્રો બુભુજે જગતીમિમામ્ ॥ ૯॥

એકાદશાર્બુદાબ્દાનામવ્યાહતબલેન્દ્રિયઃ ।
યદા સૂર્યઃ પૃથિવ્યાશ્ચ વિભાગે પ્રથમેઽતપત્ ॥ ૧૦॥

ભાગે દ્વિતીયે તત્રાસીદન્ધકારોદયઃ કિલ ।
એવં વ્યતિકરં રાજા વિલોક્ય મનસા ચિરમ્ ॥ ૧૧॥

પ્રશાસ્તિ મયિ ભૂમ્યાં ચ તમઃ પ્રાદુર્ભવેત્કથમ્ ।
એવં નિવારયિષ્યામિ ભૂમૌ યોગબલેન ચ ॥ ૧૨॥

એવં વ્યવસિતો રાજા પુત્રઃ સ્વાયમ્ભુવસ્ય સઃ ।
રથેનાદિત્યવર્ણેન સપ્તકૃત્વઃ પ્રકાશયન્ ॥ ૧૩॥

તસ્યાપિ ગચ્છતો રાજ્ઞો ભૂમૌ યદ્રથનેમયઃ ।
પતિતાસ્તે સમુદ્રાખ્યાં ભેજિરે લોકહેતવે ॥ ૧૪॥

જાતાઃ પ્રદેશાસ્તે સપ્ત દ્વીપા ભૂમૌ વિભાગશઃ ।
રથનેમિસમુત્થાસ્તે પરિખાઃ સપ્ત સિન્ધવઃ ॥ ૧૫॥

યત આસંસ્તતઃ સપ્ત ભુવો દ્વીપા હિ તે સ્મૃતાઃ ।
જમ્બુદ્વીપઃ પ્લક્ષદ્વીપઃ શાલ્મલીદ્વીપસંજ્ઞકઃ ॥ ૧૬॥

કુશદ્વીપઃ ક્રૌઞ્ચદ્વીપઃ શાકદ્વીપશ્ચ પુષ્કરઃ ।
તેષાં ચ પરિમાણં તુ દ્વિગુણં ચોત્તરોત્તરમ્ ॥ ૧૭॥

સમન્તતશ્ચોપક્લૃપ્તં બહિર્ભાગક્રમેણ ચ ।
ક્ષારોદેક્ષુરસોદૌ ચ સુરોદશ્ચ ઘૃતોદકઃ ॥ ૧૮॥

ક્ષીરોદો દધિમણ્ડોદઃ શુદ્ધોદશ્ચેતિ તે સ્મૃતાઃ ।
સપ્તૈતે પ્રતિવિખ્યાતાઃ પૃથિવ્યાં સિન્ધવસ્તદા ॥ ૧૯॥

પ્રથમો જમ્બુદ્વીપાખ્યો યઃ ક્ષારોદેન વેષ્ટિતઃ ।
તત્પતિં વિદધે રાજા પુત્રમાગ્નીધ્રસંજ્ઞકમ્ ॥ ૨૦॥

પ્લક્ષદ્વીપે દ્વિતીયેઽસ્મિન્દ્વીપેક્ષુરસસમ્પ્લુતે ।
જાતસ્તદધિપઃ પ્રૈયવ્રત ઇધ્માદિજિહ્વકઃ ॥ ૨૧॥

શાલ્મલીદ્વીપ એતસ્મિન્સુરોદધિપરિપ્લુતે ।
યજ્ઞબાહું તદધિપં કરોતિ સ્મ પ્રિયવ્રતઃ ॥ ૨૨॥

કુશદ્વીપેઽતિરમ્યે ચ ઘૃતોદેનોપવેષ્ટિતે ।
હિરણ્યરેતા રાજાભૂત્પ્રિયવ્રતતનૂજનિઃ ॥ ૨૩॥

ક્રૌઞ્ચદ્વીપે પઞ્ચમે તુ ક્ષીરોદપરિસમ્પ્લુતે ।
પ્રૈયવ્રતો ઘૃતપૃષ્ઠઃ પતિરાસીન્મહાબલઃ ॥ ૨૪॥

શાકદ્વીપે ચારુતરે દધિમણ્ડોદસઙ્કુલે ।
મેધાતિથિરભૂદ્રાજા પ્રિયવ્રતસુતો વરઃ ॥ ૨૫॥

પુષ્કરદ્વીપકે શુદ્ધોદકસિન્ધુસમાકુલે ।
વીતિહોત્રો બભૂવાસૌ રાજા જનકસમ્મતઃ ॥ ૨૬॥

કન્યામૂર્જસ્વતીનામ્નીં દદાવુશનસે વિભુઃ ।

આસીત્તસ્યાં દેવયાની કન્યા કાવ્યસ્ય વિશ્રુતા ॥ ૨૭॥

એવં વિભજ્ય પુત્રેભ્યઃ સપ્તદ્વીપાન્ પ્રિયવ્રતઃ ।
વિવેકવશગો ભૂત્વા યોગમાર્ગાશ્રિતોઽભવત્ ॥ ૨૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવિષયે પ્રિયવ્રતવંશવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૮.૪॥

## ૮.૫ પઞ્ચમોઽધ્યાયઃ । ભુવનલોકવર્ણને દ્વીપવર્ષવિભેદવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
દેવર્ષે શ‍ૃણુ વિસ્તારં દ્વીપવર્ષવિભેદતઃ ।
ભૂમણ્ડલસ્ય સર્વસ્ય યથા દેવપ્રકલ્પિતમ્ ॥ ૧॥

સમાસાત્સમ્પ્રવક્ષ્યામિ નાલં વિસ્તરતઃ ક્વચિત્ ।
જમ્બુદ્વીપઃ પ્રથમતઃ પ્રમાણે લક્ષયોજનઃ ॥ ૨॥

વિશાલો વર્તુલાકારો યથાબ્જસ્ય ચ કર્ણિકા ।
નવ વર્ષાણિ યસ્મિંશ્ચ નવસાહસ્રયોજનૈઃ ॥ ૩॥

આયામૈઃ પરિસઙ્ખ્યાનિ ગિરિભિઃ પરિતઃ શ્રિતૈઃ ।
અષ્ટાભિર્દીર્ઘરૂપૈશ્ચ સુવિભક્તાનિ સર્વતઃ ॥ ૪॥

ધનુર્વત્સંસ્થિતે જ્ઞેયે દ્વે વર્ષે દક્ષિણોત્તરે ।
દીર્ઘાણિ તત્ર ચત્વારિ ચતુરસ્રમિલાવૃતમ્ ॥ ૫॥

ઇલાવૃતં મધ્યવર્ષં યન્નાભ્યાં સુપ્રતિષ્ઠિતઃ ।
સૌવર્ણો ગિરિરાજોઽયં લક્ષયોજનમુચ્છ્રિતઃ ॥ ૬॥

કર્ણિકારૂપ એવાયં ભૂગોલકમલસ્ય ચ ।
મૂર્ધ્નિ દ્વાત્રિંશત્સહસ્રયોજનૈર્વિતતસ્ત્વયમ્ ॥ ૭॥

મૂલે ષોડશસાહસ્રસ્તાવતાન્તર્ગતઃ ક્ષિતૌ ।
ઇલાવૃતસ્યોત્તરતો નીલઃ શ્વેતશ્ચ શ‍ૃઙ્ગવાન્ ॥ ૮॥

ત્રયો વૈ ગિરયઃ પ્રોક્તા મર્યાદાવધયસ્ત્રિષુ ।
રમ્યકાખ્યે તથા વર્ષે દ્વિતીયે ચ હિરણ્મયે ॥ ૯॥

કુરુવર્ષે તૃતીયે તુ મર્યાદાં વ્યઞ્જયન્તિ તે ।
પ્રાગાયતા ઉભયતઃ ક્ષારોદાવધયસ્તથા ॥ ૧૦॥

દ્વિસહસ્રપૃથુતરાસ્તથા એકૈકશઃ ક્રમાત્ ।
પૂર્વાત્પૂર્વાચ્ચોત્તરસ્યાં દશાંશાદધિકાંશતઃ ॥ ૧૧॥

દૈર્ઘ્ય એવ હ્રસન્તીમે નાનાનદનદીયુતાઃ ।
ઇલાવૃતાદ્દક્ષિણતો નિષધો હેમકૂટકઃ ॥ ૧૨॥

હિમાલયશ્ચેતિ ત્રયઃ પ્રાગ્વિસ્તીર્ણાઃ સુશોભનાઃ ।
અયુતોત્સેધભાજસ્તે યોજનૈઃ પરિકીર્તિતાઃ ॥ ૧૩॥

હરિવર્ષં કિમ્પુરુષં ભારતં ચ યથાતથમ્ ।
વિભાગાત્કથયન્ત્યેતે મર્યાદાગિરયસ્ત્રયઃ ॥ ૧૪॥

ઇલાવૃતાત્પશ્ચિમતો માલ્યવાન્નામપર્વતઃ ।
પૂર્વેણ ચ તતઃ શ્રીમાન્ ગન્ધમાદનપર્વતઃ ॥ ૧૫॥

આનીલનિષધં ત્વેતૌ ચાયતૌ દ્વિસહસ્રતઃ ।
યોજનૈઃ પૃથુતાં યાતૌ મર્યાદાકારકૌ ગિરી ॥ ૧૬॥

કેતુમાલાખ્યભદ્રાશ્વવર્ષયોઃ પ્રથિતૌ ચ તૌ ।
મન્દરશ્ચ તથા મેરુમન્દરશ્ચ સુપાર્શ્વકઃ ॥ ૧૭॥

કુમુદશ્ચેતિ વિખ્યાતા ગિરયો મેરુપાદકાઃ ।
યોજનાયુતવિસ્તારોન્નાહા મેરોશ્ચતુર્દિશમ્ ॥ ૧૮॥

અવષ્ટમ્ભકરાસ્તે તુ સર્વતોઽભિવિરાજિતાઃ ।
એતેષુ ગિરિષુ પ્રાપ્તાઃ પાદપાશ્ચૂતજમ્બુની ॥ ૧૯॥

કદમ્બન્યગ્રોધ ઇતિ ચત્વારઃ પર્વતાઃ સ્થિતાઃ ।
કેતવો ગિરિરાજેષુ એકાદશશતોચ્છ્રયાઃ ॥ ૨૦॥

તાવદ્વિટપવિસ્તારાઃ શતાખ્યપરિણાહિનઃ ।
ચત્વારશ્ચ હ્રદાસ્તેષુ પયોમધ્વિક્ષુસજ્જલાઃ ॥ ૨૧॥

યદુપસ્પર્શિનો દેવા યોગૈશ્વર્યાણિ વિન્દતે ।
દેવોદ્યાનાનિ ચત્વારિ ભવન્તિ લલનાસુખાઃ ॥ ૨૨॥

નન્દનં ચૈત્રરથકં વૈભ્રાજં સર્વભદ્રકમ્ ।
યેષુ સ્થિત્વામરગણા લલનાયૂથસંયુતાઃ ॥ ૨૩॥

ઉપદેવગણૈર્ગીતમહિમાનો મહાશયાઃ ।

વિહરન્તિ સ્વતન્ત્રાસ્તે યથાકામં યથાસુખમ્ ॥ ૨૪॥

મન્દરોત્સઙ્ગસંસ્થસ્ય દેવચૂતસ્ય મસ્તકાત્ ।
એકાદશશતોચ્છ્રાયાત્ફલાન્યમૃતભાઞ્જિ ચ ॥ ૨૫॥

ગિરિકૂટપ્રમાણાનિ સુસ્વાદૂનિ મૃદૂનિ ચ ।
તેષાં વિશીર્યમાણાનાં ફલાનાં સુરસેન ચ ॥ ૨૬॥

અરુણોદસવર્ણેન અરુણોદા પ્રવર્તતે ।
નદી રમ્યજલા દેવદૈત્યરાજપ્રપૂજિતા ॥ ૨૭॥

અરુણાખ્યા મહારાજ વર્તતે પાપહારિણી ।
પૂજયન્તિ ચ તાં દેવીં સર્વકામફલપ્રદામ્ ॥ ૨૮॥

નાનોપહારબલિભિઃ કલ્મષઘ્નભયપ્રદામ્ ।
તસ્યાઃ કૃપાવલોકેન ક્ષેમારોગ્યં વ્રજન્તિ તે ॥ ૨૯॥

આદ્યા માયાતુલાનન્તા પુષ્ટિરીશ્વરમાલિની ।
દુષ્ટનાશકરી કાન્તિદાયિનીતિ સ્મૃતા ભુવિ ॥ ૩૦॥

અસ્યાઃ પૂજાપ્રભાવેણ જામ્બૂનદમુદાવહત્ ॥ ૩૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનલોકવર્ણને દ્વીપવર્ષવિભેદવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૮.૫॥

## ૮.૬ ષષ્ઠોઽધ્યાયઃ । ભુવનકોશવર્ણનેઽરુણોદાદિનદીનાં નિસર્ગસ્થાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અરુણોદા નદી યા તુ મયા પ્રોક્તા ચ નારદ ।
મન્દરાન્નિપતન્તી સા પૂર્વેણેલાવૃતં પ્લવેત્ ॥ ૧॥

યજ્જોષણાદ્ભવાન્યાશ્ચાનુચરીણાં સ્ત્રિયામપિ ।
યક્ષગન્ધર્વપત્નીનાં દેહગન્ધવહોઽનિલઃ ॥ ૨॥

વાસયત્યભિતો ભૂમિં દશયોજનસઙ્ખ્યયા ।
એવં જમ્બૂફલાનાં ચ તુઙ્ગદેશનિપાતનાત્ ॥ ૩॥

વિશીર્યતામનસ્થીનાં કુઞ્જરાઙ્ગપ્રમાણિનામ્ ।
રસેન ચ નદી જમ્બૂનામ્ની મેર્વાખ્યમન્દરાત્ ॥ ૪॥

પતન્તી ભૂમિભાગે ચ દક્ષિણેલાવૃતં ગતા ।
દેવી જમ્બૂફલાસ્વાદતુષ્ટા જમ્બ્વાદિની સ્મૃતા ॥ ૫॥

તત્રત્યાનાં ચ લોકાનાં દેવનાગર્ષિરક્ષસામ્ ।
પૂજનીયપદા માન્યા સર્વભૂતદયાકરી ॥ ૬॥

પાવની પાપિનાં રોગનાશિની સ્મરતામપિ ।
કીર્તિતા વિઘ્નસંહર્ત્રી માનનીયા દિવૌકસામ્ ॥ ૭॥

કોકિલાક્ષી કામકલા કરુણા કામપૂજિતા ।
કઠોરવિગ્રહા ધન્યા નાકિમાન્યા ગભસ્તિની ॥ ૮॥

એભિર્નામપદૈઃ કામં જપનીયા સદા નૃણામ્ ।
જમ્બૂનદીરોધસોર્યા મૃત્તિકાતીરવર્તિની ॥ ૯॥

જમ્બૂરસેનાનુવિદ્ધ્યમાના વાય્વર્કયોગતઃ ।
વિદ્યાધરામરસ્ત્રીણાં ભૂષણં વિવિધં મહત્ ॥ ૧૦॥

જામ્બૂનદં સુવર્ણં ચ પ્રોક્તં દેવવિનિર્મિતમ્ ।
યત્સુવર્ણં ચ વિબુધા યોષિદ્ભિઃ કામુકાઃ સદા ॥ ૧૧॥

મુકુટં કટિસૂત્રં ચ કેયૂરાદીન્પ્રકુર્વતે ।
મહાકદમ્બઃ સમ્પ્રોક્તઃ સુપાર્શ્વગિરિસંસ્થિતઃ ॥ ૧૨॥

તસ્ય કોટરદેશેભ્યઃ પઞ્ચ ધારાશ્ચ યાઃ સ્મૃતાઃ ।
સુપાર્શ્વગિરિમૂર્ધ્નીહ પતન્ત્યેતા ભુવં ગતાઃ ॥ ૧૩॥

મધુધારાઃ પઞ્ચ તાસ્તુ પશ્ચિમેલાવૃતં પ્લુતાઃ ।
યાશ્ચોપભુજ્યમાનાનાં દેવાનાં મુખગન્ધભૃત્ ॥ ૧૪॥

વાયુઃ સમન્તતોઽગચ્છચ્છતયોજનવાસનઃ ।
ધારેશ્વરી મહાદેવી ભક્તાનાં કાર્યકારિણી ॥ ૧૫॥

દેવપૂજ્યા મહોત્સાહા કાલરૂપા મહાનના ।
વસતે કર્મફલદા કાન્તારગ્રહણેશ્વરી ॥ ૧૬॥

કરાલદેહા કાલાઙ્ગી કામકોટિપ્રવર્તિની ।
ઇત્યેતૈર્નામભિઃ પૂજ્યા દેવી સર્વસુરેશ્વરી ॥ ૧૭॥

એવં કુમુદરૂઢો યો નામ્ના શતબલો વટઃ ।
તત્સ્કન્ધેભ્યોઽધોમુખાશ્ચ નદાઃ કુમુદમૂર્ધતઃ ॥ ૧૮॥

પયોદધિમધુઘૃતગુડાન્નાદ્યમ્બરાદિભિઃ ।
શય્યાસનાદ્યાભરણૈઃ સર્વે કામદુઘાશ્ચ તે ॥ ૧૯॥

ઉત્તરેણેલાવૃતં તે પ્લાવયન્તિ સમન્તતઃ ।
મીનાક્ષી તત્તલે દેવી દેવાસુરનિષેવિતા ॥ ૨૦॥

નીલામ્બરા રૌદ્રમુખી નીલાલકયુતા ચ સા ।
નાકિનાં દેવસઙ્ઘાનાં ફલદા વરદા ચ સા ॥ ૨૧॥

અતિમાન્યાતિપૂજ્યા ચ મત્તમાતઙ્ગગામિની ।
મદનોન્માદિની માનપ્રિયા માનપ્રિયાન્તરા ॥ ૨૨॥

મારવેગધરા મારપૂજિતા મારમાદિની ।
મયૂરવરશોભાઢ્યા શિખિવાહનગર્ભભૂઃ ॥ ૨૩॥

એભિર્નામપદૈર્વન્દ્યા દેવી સા મીનલોચના ।
જપતાં સ્મરતાં માનદાત્રી ચેશ્વરસઙ્ગિની ॥ ૨૪॥

તેષાં નદાનાં પાનીયપાનાનુગતચેતસામ્ ।
પ્રજાનાં ન કદાચિત્સ્યાદ્વલીપલિતલક્ષણમ્ ॥ ૨૫॥

ક્લમસ્વેદાદિદૌર્ગન્ધ્યં જરામયમૃતિભ્રમાઃ ।
શીતોષ્ણવાતવૈવર્ણ્યમુખોપપ્લવસઞ્ચયાઃ ॥ ૨૬॥

નાપદશ્ચૈવ જાયન્તે યાવજ્જીવં સુખં ભવેત્ ।
નૈરન્તર્યેણ તત્સ્યાદ્ધૈ સુખં નિરતિશાયકમ્ ॥ ૨૭॥

તત ઊર્ધ્વં પ્રવક્ષ્યામિ સન્નિવેશં ચ તદ્ગિરેઃ ।
સુવર્ણમયનામ્નો વૈ સુમેરોઃ પર્વતાઃ પૃથક્ ॥ ૨૮॥

ગિરયો વિંશતિપરાઃ કર્ણિકાયા ઇવેહ તે ।
કેસરીભૂય સર્વેઽપિ મેરોર્મૂલવિભાગકે ॥ ૨૯॥

પરિતશ્ચોપક્લૃપ્તાસ્તે તેષાં નામાનિ શ‍ૃણ્વતઃ ।
કુરઙ્ગઃ કુરગશ્ચૈવ કુસુમ્ભોઽથો વિકઙ્કતઃ ॥ ૩૦॥

ત્રિકૂટઃ શિશિરશ્ચૈવ પતઙ્ગો રુચકસ્તથા ।
નિષધશ્ચ શિનીવાસઃ કપિલઃ શઙ્ખ એવ ચ ॥ ૩૧॥

વૈદૂર્યશ્ચારુધિશ્ચૈવ હંસો ઋષભ એવ ચ ।

નાગઃ કાલઞ્જરશ્ચૈવ નારદશ્ચેતિ વિંશતિઃ ॥ ૩૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણનેઽરુણોદાદિનદીનાં નિસર્ગસ્થાનવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૮.૬॥

## ૮.૭ સપ્તમોઽધ્યાયઃ । ભુવનકોશવર્ણને પર્વતનદીવર્ષાદિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ગિરી મેરું ચ પૂર્વેણ દ્વૌ ચાષ્ટાદશયોજનૈઃ ।
સહસ્રૈરાયતૌ ચોદગ્દ્વિસહસ્રં પૃથૂચ્ચકૌ ॥ ૧॥

જઠરો દેવકૂટશ્ચ તાવેતૌ ગિરિવિર્યકૌ ।
મેરોઃ પશ્ચિમતોઽદ્રી દ્વૌ પવમાનસ્તથાપરઃ ॥ ૨॥

પારિયાત્રશ્ચ તૌ તાવદ્વિખ્યાતૌ તુઙ્ગવિસ્તરૌ ।
મેરોર્દક્ષિણતઃ ખ્યાતૌ કૈલાસકરવીરકૌ ॥ ૩॥

પ્રાગાયતૌ પૂર્વવૃત્તૌ મહાપર્વતરાજકૌ ।
એવં ચોત્તરતો મેરોસ્ત્રિશૃઙ્ગમકરૌ ગિરી ॥ ૪॥

એતૈશ્ચાદ્રિવરૈરષ્ટસઙ્ખ્યૈઃ પરિવૃતો ગિરિઃ ।
સુમેરુઃ કાઞ્ચનગિરિઃ પરિભ્રાજન્ રવિર્યથા ॥ ૫॥

મેરોર્મૂર્ધનિ ધાતુર્હિ પુરી પઙ્કજજન્મનઃ ।
મધ્યતશ્ચોપક્લૃપ્તેયં દશસાહસ્રયોજનૈઃ ॥ ૬॥

સમાનચતુરસ્રાં ચ શાતકૌમ્ભમયીં પુરીમ્ ।
વર્ણયન્તિ મહાત્માનઃ પરાવરવિદો બુધાઃ ॥ ૭॥

તાં પુરીમનુલોકાનામષ્ટાનામીશિષાં પરાઃ ।
પુર્યઃ પ્રખ્યાતસૌવર્ણરૂપાસ્તાશ્ચ યથાદિશમ્ ॥ ૮॥

યથારૂપં સાર્ધનેત્રસહસ્રપ્રમિતાઃ કૃતાઃ ।
મેરોર્નવ પુરાણિ સ્યુર્મનોવત્યમરાવતી ॥ ૯॥

તેજોવતી સંયમની તથા કૃષ્ણાઙ્ગનાપરા ।
શ્રદ્ધાવતી ગન્ધવતી તથા ચાન્યા મહોદયા ॥ ૧૦॥

યશોવતી ચ બ્રહ્મેન્દ્રવહ્ન્યાદીનાં યથાક્રમમ્ ।
તત્રૈવ યજ્ઞલિઙ્ગસ્ય વિષ્ણોર્ભગવતો વિભોઃ ॥ ૧૧॥

વામપાદાઙ્ગુષ્ઠનખનિર્ભિન્નસ્ય ચ નારદ ।
અણ્ડોર્ધ્વભાગરન્ધ્રસ્ય મધ્યાત્સંવિશતી દિવઃ ॥ ૧૨॥

મૂર્ધન્યવતતારેયં ગઙ્ગા સંવિશતી વિભો ।
લોકાનામખિલાનાં ચ પાપહારિજલાકુલા ॥ ૧૩॥

ઇયં ચ સાક્ષાદ્ભગવત્પદી લોકેષુ વિશ્રુતા ।
કાલેન મહતા સા તુ યુગસાહસ્રકેણ તુ ॥ ૧૪॥

દિવો મૂર્ધાનમાગત્ય દેવી દેવનદીશ્વરી ।
યત્તદ્વિષ્ણુપદં નામ સ્થાનં ત્રૈલોક્યવિશ્રુતમ્ ॥ ૧૫॥

ઔત્તાનપાદિર્યત્રાસ્તે ધ્રુવઃ પરમપાવનઃ ।
ભગવત્પાદયુગલં પદ્મકોશરજો દધત્ ॥ ૧૬॥

અદ્યાપ્યાસ્તે સ રાજર્ષિઃ પદવીમચલાં શ્રિતઃ ।
તત્ર સપ્તર્ષયસ્તસ્ય પ્રભાવજ્ઞા મહાશયાઃ ॥ ૧૭॥

પ્રદક્ષિણં પ્રક્રમન્તિ સર્વલોકહિતેપ્સવઃ ।
આત્યન્તિકી સિદ્ધિરિયં તપતાં સિદ્ધિદાયિની ॥ ૧૮॥

આદ્રિયન્તે ચ શિરસા જટાજૂટોષિતેન ચ ।
તતો વિષ્ણુપદાદ્દેવી નૈકસાહસ્રકોટિભિઃ ॥ ૧૯॥

વિમાનૈરાકુલે દેવયાનેઽવતરતી ચ સા ।
ચન્દ્રમણ્ડલમાપ્લાવ્ય પતન્તી બ્રહ્મસદ્મનિ ॥ ૨૦॥

ચતુર્ધા ભિદ્યમાના સા બ્રહ્મલોકે ચ નારદ ।
ચતુર્ભિર્નામભિર્દેવી ચતુર્દિશમભિસૃતા ॥ ૨૧॥

સરિતાં ચ નદીનાં ચ પતિમેવાન્વપદ્યત ।
સીતા ચાલકનન્દા ચ ચતુર્ભદ્રેતિ નામભિઃ ॥ ૨૨॥

સીતા ચ બ્રહ્મસદનાચ્છિખરેભ્યઃ ક્ષમાભૃતામ્ ।
કેસરાભિધનામ્ના ચ પ્રસ્રવન્તી ચ સ્વર્ણદી ॥ ૨૩॥

ગન્ધમાદનમૂર્ધ્નીહ પતિતા પાપહારિણી ।
અન્તરેણ તુ ભદ્રાશ્વવર્ષં પ્રાચ્યાં સમાગતા ॥ ૨૪॥

ક્ષારોદધિં ગતા સા તુ દ્યુનદી દેવપૂજિતા ।

તતો માલ્યવતઃ શૃઙ્ગાદ્ દ્વિતીયા પરિનિર્ગતા ॥ ૨૫॥

તતો વેગવતી ભૂત્વા કેતુમાલં સમાગતા ।
ચક્ષુર્નામ્ની દેવનદી પ્રતીચ્યાં દિશ્યુપાગતા ॥ ૨૬॥

સરિતાં પતિમાવિષ્ટા સા ગઙ્ગા દેવવન્દિતા ।
તતસ્તૃતીયા ધારા તુ નામ્ના ખ્યાતા ચ નારદ ॥ ૨૭॥

પુણ્યા ચાલકનન્દા વૈ દક્ષિણેનાબ્જભૂપદાત્ ।
વનાનિ ગિરિકૂટાનિ સમતિક્રમ્ય ચાગતા ॥ ૨૮॥

હેમકૂટં ગિરિવરં પ્રાપ્તાતોઽપીહ નિર્ગતા ।
અતિવેગવતી ભૂત્વા ભારતં ચાગતાપરા ॥ ૨૯॥

દક્ષિણં જલધિં પ્રાપ્તા તૃતીયા સા સરિદ્વરા ।
યસ્યાઃ સ્નાનાય સરતાં મનુજાનાં પદે પદે ॥ ૩૦॥

રાજસૂયાશ્વમેધાદિ ફલં તુ ન હિ દુર્લભમ્ ।
તતશ્ચતુર્થી ધારા તુ ભૃઙ્ગવત્પર્વતાત્પુનઃ ॥ ૩૧॥

ભદ્રાભિધા સંસ્રવન્તી કુરૂન્સન્તર્પ્ય ચોત્તરાન્ ।
સમુદ્રં સમનુપ્રાપ્તા ગઙ્ગા ત્રૈલોક્યપાવની ॥ ૩૨॥

અન્યે નદાશ્ચ નદ્યશ્ચ વર્ષે વર્ષેઽપિ સન્તિ હિ ।
બહુશો મેરુમન્દારપ્રસૂતાશ્ચૈવ નારદ ॥ ૩૩॥

તત્રાપિ ભારતં વર્ષં કર્મક્ષેત્રમુશન્તિ હિ ।
અન્યાનિ ચાષ્ટવર્ષાણિ ભૌમસ્વર્ગપ્રદાનિ ચ ॥ ૩૪॥

સ્વર્ગિણાં પુણ્યશેષસ્ય ભોગસ્થાનાનિ નારદ ।
પુરુષાણાં ચાયુતાયુર્વજ્રાઙ્ગા દેવસન્નિભાઃ ॥ ૩૫॥

પુરુષા નાગસાહસ્રૈર્દશભિઃ પરિકલ્પિતાઃ ।
મહાસૌરતસન્તુષ્ટાઃ કલત્રાઢ્યાઃ સુખાન્વિતાઃ ॥ ૩૬॥

એકવર્ષોનકે ચાયુષ્યાપ્તગર્ભાઃ સ્ત્રિયોઽપિ હિ ।
ત્રેતાયુગસમઃ કાલો વર્તતે સર્વદૈવ હિ ॥ ૩૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને પર્વતનદીવર્ષાદિવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૮.૭॥

## ૮.૮ અષ્ટમોઽધ્યાયઃ । ભુવનકોશવર્ણને ઇલાવૃતભદ્રાશ્વવર્ષવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
તેષુ વર્ષેષુ દેવેશાઃ પૂર્વોક્તૈઃ સ્તવનૈઃ સદા ।
પૂજયન્તિ મહાદેવીં જપધ્યાનસમાધિભિઃ ॥ ૧॥

સર્વર્તુકુસુમશ્રેણી શોભિતા વનરાજયઃ ।
ફલાનાં પલ્લવાનાં ચ યત્ર શોભા નિરન્તરમ્ ॥ ૨॥

તેષુ કાનનવર્ષેષુ વર્ષપર્વતસાનુષુ ।
ગિરિદ્રોણીષુ સર્વાસુ નિર્મલોદકરાશિષુ ॥ ૩॥

વિકચોત્પલમાલાસુ હંસસારસસઞ્ચયૈઃ ।
વિમિશ્રિતેષુ તેષ્વેવ પક્ષિભિઃ કૂજિતેષુ ચ ॥ ૪॥

જલક્રીડાદિભિશ્ચિત્રવિનોદૈઃ ક્રીડયન્તિ ચ ।
સુન્દરીલલિતભ્રૂણાં વિલાસાયતનેષુ ચ ॥ ૫॥

તત્રત્યા વિહરન્ત્યત્ર સ્વૈરં યુવતિભિઃ સહ ।
નવસ્વપિ ચ વર્ષેષુ ભગવાનાદિપૂરુષઃ ॥ ૬॥

(નારાયણાખ્યો લોકાનામનુગ્રહરસૈકદૃક્ ।)
દેવીમારાધયન્નાસ્તે સ ચ સર્વૈશ્ચ પૂજ્યતે ।
આત્મવ્યૂહેનેજ્યયાસૌ સન્નિધત્તે સમાહિતઃ ॥ ૭॥

ઇલાવૃતે તુ ભગવાન્ પદ્મજાક્ષિસમુદ્ભવઃ ।
એક એવ ભવો દેવો નિત્યં વસતિ સાઙ્ગનઃ ॥ ૮॥

તત્ક્ષેત્રે નાપરઃ કશ્ચિત્પ્રવેશં વિતનોતિ ચ ।
ભવાન્યાઃ શાપતસ્તત્ર પુમાન્સ્ત્રી ભવતિ સ્ફુટમ્ ॥ ૯॥

ભવાનીનાથકૈઃ સ્ત્રીણામસઙ્ખ્યૈર્ગણકોટિભિઃ ।
સંરુધ્યમાનો દેવેશો દેવં સઙ્કર્ષણં ભજન્ ॥ ૧૦॥

આત્મના ધ્યાનયોગેન સર્વભૂતહિતેચ્છયા ।
તાં તામસીં તુરીયાં ચ મૂર્તિં પ્રકૃતિમાત્મનઃ ॥ ૧૧॥

ઉપધાવતે ચૈકાગ્રમનસા ભગવાનજઃ ।
શ્રીભગવાનુવાચ ।

ઓન્નમો ભગવતે મહાપુરુષાય
સર્વગુણસઙ્ખ્યાનાયાનન્તાયાવ્યક્તાય નમ ઇતિ ॥ ૧૨॥

ભજે ભજન્યારણપાદપઙ્કજં
ભગસ્ય કૃત્સ્નસ્ય પરં પરાયણમ્ ।
ભક્તેષ્વલં ભાવિતભૂતભાવનં
ભવાપહં ત્વા ભવ ભાવમીશ્વરમ્ ॥ ૧૩॥

ન યસ્ય માયાગુણકર્મવૃત્તિભિ-
ર્નિરીક્ષિતો હ્યણ્વપિ દૃષ્ટિરજ્યતે ।
ઈશે યથા નો જિતમન્યુરંહસા
કસ્તં ન મન્યેત જિગીષુરાત્મનઃ ॥ ૧૪॥

અસદ્દૃશો યઃ પ્રતિભાતિ માયયા
ક્ષીબેવ મધ્વાસવતામ્રલોચનઃ ।
ન નાગવધ્વોઽર્હણ ઈશિરે હ્રિયા
યત્પાદયોઃ સ્પર્શનધર્ષિતેન્દ્રિયાઃ ॥ ૧૫॥

યમાહુરસ્ય સ્થિતિજન્મસંયમં
ત્રિભિર્વિહીનં યમનન્તમૃષયઃ ।
ન વેદ સિદ્ધાર્થમિવ ક્વચિત્સ્થિતં
ભૂમણ્ડલં મૂર્ધસહસ્રધામસુ ॥ ૧૬॥

યસ્યાદ્ય આસીદ્ ગુણવિગ્રહો મહાન્
વિજ્ઞાનધિષ્ણ્યો ભગવાનજઃ કિલ ।
યત્સંવૃતોઽહં ત્રિવૃતા સ્વતેજસા
વૈકારિકં તામસમૈન્દ્રિયં સૃજે ॥ ૧૭॥

એતે વયં યસ્ય વશે મહાત્મનઃ
સ્થિતાઃ શકુન્તા ઇવ સૂત્રયન્ત્રિતાઃ ।
મહાનહંવૈકૃતતામસેન્દ્રિયાઃ
સૃજામ સર્વે યદનુગ્રહાદિદમ્ ॥ ૧૮॥

યન્નિર્મિતાં કર્હ્યપિ કર્મપર્વણીં
માયાં જનોઽયં ગુરુસર્ગમોહિતઃ ।
ન વેદ નિસ્તારણયોગમઞ્જસા
તસ્મૈ નમસ્તે વિલયોદયાત્મને ॥ ૧૯॥

શ્રીનારાયણ ઉવાચ ।
એવં સ ભગવાન્ રુદ્રો દેવં સઙ્કર્ષણં પ્રભુમ્ ।
ઇલાવૃતમુપાસીત દેવીગણસમાહિતઃ ॥ ૨૦॥

તથૈવ ધર્મપુત્રોઽસૌ નામ્ના ભદ્રશ્રવા ઇતિ ।
તત્કુલસ્યાપિ પતયઃ પુરુષા ભદ્રસેવકાઃ ॥ ૨૧॥

ભદ્રાશ્વવર્ષે તાં મૂર્તિં વાસુદેવસ્ય વિશ્રુતામ્ ।
હયમૂર્તિભિદા તાં તુ હયગ્રીવપદાઙ્કિતામ્ ॥ ૨૨॥

પરમેણ સમાધ્યન્યવારકેણ નિયન્ત્રિતામ્ ।
એવમેવ ચ તાં મૂર્તિં ગૃણન્ત ઉપયાન્તિ ચ ॥ ૨૩॥

ભદ્રશ્રવસ ઊચુઃ ।
ૐ નમો ભગવતે ધર્માયાત્મવિશોધનાય નમ ઇતિ ।
અહો વિચિત્રં ભગવદ્વિચેષ્ટિતં
ઘ્નન્તં જનોઽયં હિ મિષન્ન પશ્યતિ ।
ધ્યાયન્ન સદ્યર્હિ વિકર્મ સેવિતું
નિર્હૃત્ય પુત્રં પિતરં જિજીવિષુઃ ॥ ૨૪॥

વદન્તિ વિશ્વં કવયઃ સ્મ નશ્વરં
પશ્યન્તિ ચાધ્યાત્મવિદો વિપશ્ચિતઃ ।
તથાપિ મુહ્યન્તિ તવાજ માયયા
સુવિસ્મિતં કૃત્યમજં નતોઽસ્મિ તમ્ ॥ ૨૫॥

વિશ્વોદ્ભવસ્થાનનિરોધકર્મ તે
હ્યકર્તુરઙ્ગીકૃતમપ્યપાવૃતઃ ।
યુક્તં ન ચિત્રં ત્વયિ કાર્યકારણે
સર્વાત્મનિ વ્યતિરિક્તે ચ વસ્તુતઃ ॥ ૨૬॥

વેદાન્ યુગાન્તે તમસા તિરસ્કૃતાન્
રસાતલાદ્યો નૃતુરઙ્ગવિગ્રહઃ ।
પ્રત્યાદદે વૈ કવયેઽભિયાચતે
તસ્મૈ નમસ્તે વિતથેહિતાય તે ॥ ૨૭॥

એવં સ્તુવન્તિ દેવેશં હયશીર્ષં હરિં ચ તે ।

ભદ્રશ્રવસનામાનો વર્ણયન્તિ ચ તદ્ગુણાન્ ॥ ૨૮॥

એષાં ચરિતમેતદ્ધિ યઃ પઠેચ્છ્રાવયેચ્ચ યઃ ।
પાપકઞ્ચુકમુત્સૃજ્ય દેવીલોકં વ્રજેચ્ચ સઃ ॥ ૨૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને ઇલાવૃતભદ્રાશ્વવર્ષવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૮.૮॥

## ૮.૯ નવમોઽધ્યાયઃ । ભુવનકોશવર્ણને હરિવર્ષકેતુમાલરમ્યકવર્ષવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
હરિવર્ષે ચ ભગવાન્નૃહરિઃ પાપનાશનઃ ।
વર્તતે યોગયુક્તાત્મા ભક્તાનુગ્રહકારકઃ ॥ ૧॥

તસ્ય તદ્દયિતં રૂપં મહાભાગવતોઽસુરઃ ।
પશ્યન્ભક્તિસમાયુક્તઃ સ્તૌતિ તદ્ગુણતત્ત્વવિત્ ॥ ૨॥

પ્રહ્લાદ ઉવાચ ।
ૐ નમો ભગવતે નરસિંહાય નમસ્તેજસ્તેજસે
આવિરાવિર્ભવ વજ્રદંષ્ટ્ર કર્માશયાન્ રન્ધય રન્ધય
તમો ગ્રસ ગ્રસ ૐ સ્વાહા । અભયં મમાત્મનિ
ભૂયિષ્ઠાઃ ॥ ૐ ક્ષ્રૌમ્ ॥

સ્વસ્ત્યસ્તુ વિશ્વસ્ય ખલઃ પ્રસીદતાં
ધ્યાયન્તુ ભૂતાનિ શિવં મિથો ધિયા ।
મનશ્ચ ભદ્રં ભજતાદધોક્ષજે
આવેશ્યતાં નો મતિરપ્યહૈતુકી ॥ ૩॥

માગારદારાત્મજવિત્તબન્ધુષુ
સઙ્ગો યદિ સ્યાદ્ભગવત્પ્રિયેષુ નઃ ।
યઃ પ્રાણવૃત્ત્યા પરિતુષ્ટ આત્મવાન્
સિદ્ધ્યત્યદૂરાન્ન તથેન્દ્રિયપ્રિયઃ ॥ ૪॥

યત્સઙ્ગલબ્ધં નિજવીર્યવૈભવં
તીર્થં મુહુઃ સંસ્પૃશતાં હિ માનસમ્ ।
હરત્યજોઽન્તઃ શ્રુતિભિર્ગતોઽઙ્ગજં
કો વૈ ન સેવેત મુકુન્દવિક્રમમ્ ॥ ૫॥

યસ્યાસ્તિ ભક્તિર્ભગવત્યકિઞ્ચના
સર્વૈર્ગુણૈસ્તત્ર સમાસતે સુરાઃ ।
હરાવભક્તસ્ય કુતો મહદ્ગુણા
મનોરથેનાસતિ ધાવતો બહિઃ ॥ ૬॥

હરિર્હિ સાક્ષાદ્ભગવાઞ્છરીરિણા-
માત્મા ઝષાણામિવ તોયમીપ્સિતમ્ ।
હિત્વા મહાંસ્તં યદિ સજ્જતે ગૃહે
તદા મહત્ત્વં વયસા દમ્પતીનામ્ ॥ ૭॥

તસ્માદ્રજોરાગવિષાદમન્યુ-
માનસ્પૃહાભયદૈન્યાધિમૂલમ્ ।
હિત્વા ગૃહં સંસૃતિચક્રવાલં
નૃસિંહપાદં ભજતાં કુતો ભયમ્ ॥ ૮॥

એવં દૈત્યપતિઃ સોઽપિ ભક્ત્યાનુદિનમીડતે ।
નૃહરિં પાપમાતઙ્ગહરિં હૃત્પદ્મવાસિનમ્ ॥ ૯॥

કેતુમાલે ચ વર્ષે હિ ભગવાન્સ્મરરૂપધૃક્ ।
આસ્તે તદ્વર્ષનાથાનાં પૂજનીયશ્ચ સર્વદા ॥ ૧૦॥

એતેનોપાસતે સ્તોત્રજાલેન ચ રમાબ્ધિજા ।
તદ્વર્ષનાથા સતતં મહતાં માનદાયિકા ॥ ૧૧॥

રમોવાચ ।
ૐ હ્રાં હ્રીં હ્રૂં સ્મ નમો ભગવતે
હૃષીકેશાય સર્વગુણવિશેષૈર્વિલક્ષિતાત્મને
આકૂતીનાં ચિત્તીનાં ચેતસાં વિશેષાણાં ચાધિપતયે
ષોડશકલાય છન્દોમયાયાન્નમયાયામૃતમયાય
સર્વમયાય મહસે ઓજસે બલાય કાન્તાય
કામાય નમસ્તે ઉભયત્ર ભૂયાત્ ।
સ્ત્રિયો વ્રતૈસ્ત્વાં હૃષીકેશ્વરં સ્વતો
હ્યારાધ્ય લોકે પતિમાશાસતેઽન્યમ્ ।
તાસાં ન તે વૈ પરિપાન્ત્યપત્યં
પ્રિયં ધનાયૂંષિ યતોઽસ્વતન્ત્રાઃ ॥ ૧૨॥

સ વૈ પતિઃ સ્યાદકુતોભયઃ સ્વતઃ
સમન્તતઃ પાતિ ભયાતુરં જનમ્ ।
સ એક એવેતરથા મિથો ભયં
નૈવાત્મલાભાદધિમન્યતે પરમ્ ॥ ૧૩॥

યા તસ્ય તે પાદસરોરુહાર્હણં
ન કામયેત્સાખિલકામલમ્પટા ।
તદેવ રાસીપ્સિતમીપ્સિતોઽર્ચિતો
યદ્ભગ્નયાચ્ઞા ભગવન્ પ્રતપ્યતે ॥ ૧૪॥

મત્પ્રાપ્તયેઽજેશસુરાસુરાદય-
સ્તપ્યન્ત ઉગ્રં તપ ઐન્દ્રિયે ધિયઃ ।
ઋતે ભવત્પાદપરાયણાન્ન માં
વિદન્ત્યહં ત્વદ્ધૃદયા યતોઽજિત ॥ ૧૫॥

સ ત્વં મમાપ્યચ્યુત શીર્ષ્ણિ વન્દિતં
કરામ્બુજં યત્ત્વદધાયિ સાત્વતામ્ ।
બિભર્ષિ માં લક્ષ્ય વરેણ્ય માયયા
ક ઈશ્વરસ્યેહિતમૂહિતું વિભુઃ ॥ ૧૬॥

એવં કામં સ્તુવન્ત્યેવ લોકબન્ધુસ્વરૂપિણમ્ ।
પ્રજાપતિમુખા વર્ષનાથાઃ કામસ્ય સિદ્ધયે ॥ ૧૭॥

રમ્યકે નામવર્ષે ચ મૂર્તિં ભગવતઃ પરામ્ ।
માત્સ્યાં દેવાસુરૈર્વન્દ્યાં મનુઃ સ્તૌતિ નિરન્તરમ્ ॥ ૧૮॥

મનુરુવાચ ।
ૐ નમો ભગવતે મુખ્યતમાય નમઃ સત્ત્વાય
પ્રાણાયૌજસે બલાય મહામત્સ્યાય નમઃ ।
અન્તર્બહિશ્ચાખિલલોકપાલકૈ-
રદૃષ્ટરૂપો વિચરસ્યુરુસ્વનઃ ।
સ ઈશ્વરસ્ત્વં ય ઇદં વશે નય-
ન્નામ્ના યથા દારુમયીં નરઃ સ્ત્રિયમ્ ॥ ૧૯॥

યં લોકપાલાઃ કિલ મત્સરજ્વરા
હિત્વા યતન્તોઽપિ પૃથક્ સમેત્ય ચ ।
પાતું ન શેકુર્દ્વિપદશ્ચતુષ્પદઃ

સરીસૃપં સ્થાણુ યદત્ર દૃશ્યતે ॥ ૨૦॥

ભવાન્ યુગાન્તાર્ણવ ઊર્મિમાલિનિ
ક્ષોણીમિમામોષધિવીરુધાં નિધિમ્ ।
મયા સહોરુક્રમ તેઽજ ઓજસા
તસ્મૈ જગત્પ્રાણગણાત્મને નમઃ ॥ ૨૧॥

એવં સ્તૌતિ ચ દેવેશં મનુઃ પાર્થિવસત્તમઃ ।
મત્સ્યાવતારં દેવેશં સંશયચ્છેદકારણમ્ ॥ ૨૨॥

ધ્યાનયોગેન દેવસ્ય નિર્ધૂતાશેષકલ્મષઃ ।
આસ્તે પરિચરન્ભક્ત્યા મહાભાગવતોત્તમઃ ॥ ૨૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને હરિવર્ષકેતુમાલરમ્યકવર્ષવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૮.૯॥

## ૮.૧૦ દશમોઽધ્યાયઃ । ભુવનકોશવર્ણને હિરણ્મયકિમ્પુરુષવર્ષવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
હિરણ્મયે નામ વર્ષે ભગવાન્કૂર્મરૂપધૃક્ ।
આસ્તે યોગપતિઃ સોઽયમર્યમણા પૂજ્ય ઈડ્યતે ॥ ૧॥

અર્યમોવાચ ।
ૐ નમો ભગવતે અકૂપારાય સર્વસત્ત્વગુણ-
વિશેષણાય નોપલક્ષિતસ્થાનાય નમો વર્ષ્મણે
નમો ભૂમ્ને નમોઽવસ્થાનાય નમસ્તે ।
યદ્રૂપમેતન્નિજમાયયાર્પિત-
મર્થસ્વરૂપં બહુરૂપરૂપિતમ્ ।
સઙ્ખ્યા ન યસ્યાસ્ત્યયથોપલમ્ભના-
ત્તસ્મૈ નમસ્તેઽવ્યપદેશરૂપિણે ॥ ૨॥

જરાયુજં સ્વેદજમણ્ડજોદ્ભિદં
ચરાચરં દેવર્ષિપિતૃભૂતમૈન્દ્રિયમ્ ।
દ્યૌઃ ખં ક્ષિતિઃ શૈલસરિત્સમુદ્ર
દ્વીપગ્રહર્ક્ષેત્યભિધેય એકઃ ॥ ૩॥

યસ્મિન્નસઙ્ખ્યેયવિશેષનામ-

રૂપાકૃતૌ કવિભિઃ કલ્પિતેયમ્ ।
સઙ્ખ્યા યયા તત્ત્વદૃશાપનીયતે
તસ્મૈ નમઃ સાઙ્ખ્યનિદર્શનાય તે ॥ ૪॥

એવં સ્તુવતિ દેવેશમર્યમા સહ વર્ષપૈઃ ।
ગીયતે ચાપિ ભજતે સર્વભૂતભવં પ્રભુમ્ ॥ ૫॥

તથોત્તરેષુ કુરુષુ ભગવાન્યજ્ઞપૂરુષઃ ।
આદિવારાહરૂપોઽસૌ ધરણ્યા પૂજ્યતે સદા ॥ ૬॥

સમ્પૂજ્ય વિધિવદ્દેવં તદ્ભક્ત્યાર્દ્રાર્દ્રહૃત્કજા ।
ભૂમિઃ સ્તૌતિ હરિં યજ્ઞવારાહં દૈત્યમર્દનમ્ ॥ ૭॥

ભૂરુવાચ ।
ૐ નમો ભગવતે મન્ત્રતત્ત્વલિઙ્ગાય યજ્ઞક્રતવે
મહાધ્વરાવયવાય મહાવરાહાય નમઃ કર્મશુક્લાય
ત્રિયુગાય નમસ્તે ॥ ૮॥

યસ્ય સ્વરૂપં કવયો વિપશ્ચિતો
ગુણેષુ દારુષ્વિવ જાતવેદસમ્ ।
મથ્નન્તિ મથ્ના મનસા દિદૃક્ષવો
ગૂઢં ક્રિયાર્થૈર્નમ ઈરિતાત્મને ॥ ૯॥

દ્રવ્યક્રિયાહેત્વયનેશકર્તૃભિ-
ર્માયાગુણૈર્વસ્તુભિરીક્ષિતાત્મને ।
અન્વીક્ષયાઙ્ગાતિશયાત્મબુદ્ધિભિ-
ર્નિરસ્તમાયાકૃતયે નમોઽસ્તુ તે ॥ ૧૦॥

કરોતિ વિશ્વસ્થિતિસંયમોદયં
યસ્યેપ્સિતં નેપ્સિતુમીક્ષિતુર્ગુણૈઃ ।
માયા યથાઽયો ભ્રમતે તદાશ્રયં
ગ્રાવ્ણો નમસ્તે ગુણકર્મસાક્ષિણે ॥ ૧૧॥

પ્રમથ્ય દૈત્યં પ્રતિવારણં મૃધે
યો માં રસાયા જગદાદિસૂકરઃ ।
કૃત્વાગ્રદંષ્ટ્રે નિરગાદુદન્વતઃ
ક્રીડન્નિવેભઃ પ્રણતાસ્મિ તં વિભુમ્ ॥ ૧૨॥

કિમ્પુરુષે વર્ષેऽસ્મિન્ભગવન્તં દાશરથિં ચ સર્વેશમ્ ।
સીતારામં દેવં શ્રીહનુમાનાદિપૂરુષં સ્તૌતિ ॥ ૧૩॥

ૐ નમો ભગવતે ઉત્તમશ્લોકાય નમ ઇતિ ।
આર્યલક્ષણશીલવ્રતાય નમ ઉપશિક્ષિતાત્મને
ઉપાસિતલોકાય નમઃ । સાધુવાદનિકષણાય નમો
બ્રહ્મણ્યદેવાય મહાપુરુષાય મહાભાગાય નમ ઇતિ ।
યત્તદ્વિશુદ્ધાનુભવાત્મમેકં
સ્વતેજસા ધ્વસ્તગુણવ્યવસ્થમ્ ।
પ્રત્યક્ પ્રશાન્તં સુધિયોપલમ્ભનં
હ્યનામરૂપં નિરહં પ્રપદ્યે ॥ ૧૪॥

મર્ત્યાવતારસ્ત્વિહ મર્ત્યશિક્ષણં
રક્ષોવધાયૈવ ન કેવલં વિભો ।
કુતોऽન્યથા સ્યાદ્ऽऽરમતઃ સ્વ આત્મનઃ
સીતાકૃતાનિ વ્યસનાનીશ્વરસ્ય ॥ ૧૫॥

ન વૈ સ આત્માऽऽત્મવતાં સુહૃત્તમઃ
સક્તસ્ત્રિલોક્યાં ભગવાન્વાસુદેવઃ ।
ન સ્ત્રીકૃતં કશ્મલમશ્નુવીત
ન લક્ષણં ચાપિ વિહાતુમર્હતિ ॥ ૧૬॥

ન જન્મ નૂનં મહતો ન સૌભગં
ન વાઙ્ ન બુદ્ધિર્નાકૃતિસ્તોષહેતુઃ ।
તૈર્યદ્વિસૃષ્ટાનપિ નો વનૌકસ-
શ્ચકાર સખ્યે બત લક્ષ્મણાગ્રજઃ ॥ ૧૭॥

સુરોऽસુરો વાપ્યથવા નરોऽનરઃ
સર્વાત્મના યઃ સુકૃતજ્ઞમુત્તમમ્ ।
ભજેત રામં મનુજાકૃતિં હરિં
ય ઉત્તરાનનયત્કોસલાન્ દિવમ્ ॥ ૧૮॥

શ્રીનારાયણ ઉવાચ ।
એવં કિમ્પુરુષે વર્ષે સત્યસન્ધં દૃઢવ્રતમ્ ।
રામં રાજીવપત્રાક્ષં હનુમાન્ વાનરોત્તમઃ ॥ ૧૯॥

સ્તૌતિ ગાયતિ ભક્ત્યા ચ સમ્પૂજયતિ સર્વશઃ ।

ય એતચ્છૃણુયાચ્ચિત્રં રામચન્દ્રકથાનકમ્ ।
સર્વપાપવિશુદ્ધાત્મા યાતિ રામસલોકતામ્ ॥ ૨૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને હિરણ્મયકિમ્પુરુષવર્ષવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૮.૧૦॥

## ૮.૧૧ એકાદશોઽધ્યાયઃ । ભુવનકોશવર્ણને ભારતવર્ષવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ભારતાખ્યે ચ વર્ષેઽસ્મિન્નહમાદિજપૂરુષઃ ।
તિષ્ઠામિ ભવતા ચૈવ સ્તવનં ક્રિયતેઽનિશમ્ ॥ ૧॥

નારદ ઉવાચ ।
ૐ નમો ભગવતે ઉપશમશીલાયોપરતાનાત્મ્યાય
નમોઽકિઞ્ચનવિત્તાય ઋષિઋષભાય નરનારાયણાય
પરમહંસપરમગુરવે આત્મારામાધિપતયે નમો નમ ઇતિ ।
કર્તાસ્ય સર્ગાદિષુ યો ન બધ્યતે
ન હન્યતે દેહગતોઽપિ દૈહિકૈઃ ।
દ્રષ્ટુર્ન દૃશ્યસ્ય ગુણૈર્વિદૂષ્યતે
તસ્મૈ નમોઽસક્તવિવિક્તસાક્ષિણે ॥ ૨॥

ઇદં હિ યોગેશ્વરયોગનૈપુણં
હિરણ્યગર્ભો ભગવાઞ્જગાદ યત્ ।
યદન્તકાલે ત્વયિ નિર્ગુણે મનો
ભક્ત્યા દધીતોજ્ઝિતદુષ્કલેવરઃ ॥ ૩॥

યથૈહિકામુષ્મિકકામલમ્પટઃ
સુતેષુ દારેષુ ધનેષુ ચિન્તયન્ ।
શઙ્કેત વિદ્વાન્ કુકલેવરાત્યયા-
દ્યસ્તસ્ય યત્નઃ શ્રમ એવ કેવલમ્ ॥ ૪॥

તન્નઃ પ્રભો ત્વં કુકલેવરાર્પિતાં
ત્વં માયયાહં મમતામધોક્ષજ ।
ભિન્દ્યામ યેનાશુ વયં સુદુર્ભિદાં
વિધેહિ યોગં ત્વયિ નઃ સ્વભાવજમ્ ॥ ૫॥

એવં સ્તૌતિ સદા દેવં નારાયણમનામયમ્ ।
નારદો મુનિશાર્દૂલઃ પ્રજ્ઞાતાખિલસારદૃક્ ॥ ૬॥

અસ્મિન્ વૈ ભારતે વર્ષે સરિચ્છૈલાસ્તુ સન્તિ હિ ।
તાન્પ્રવક્ષ્યામિ દેવર્ષે શૃણુષ્વૈકાગ્રમાનસઃ ॥ ૭॥

મલયો મઙ્ગલપ્રસ્થો મૈનાકશ્ચ ત્રિકૂટકઃ ।
ઋષભઃ કૂટકઃ કોલ્લઃ સહ્યો દેવગિરિસ્તથા ॥ ૮॥

ઋષ્યમૂકશ્ચ શ્રીશૈલો વ્યઙ્કટાદ્રિર્મહેન્દ્રકઃ ।
વારિધારશ્ચ વિન્ધ્યશ્ચ મુક્તિમાનૃક્ષપર્વતઃ ॥ ૯॥

પારિયાત્રસ્તથા દ્રોણશ્ચિત્રકૂટગિરિસ્તથા ।
ગોવર્ધનો રૈવતકઃ કકુભો નીલપર્વતઃ ॥ ૧૦॥

ગૌરમુખશ્ચેન્દ્રકીલો ગિરિઃ કામગિરિસ્તથા ।
એતે ચાન્યેઽપ્યસઙ્ખ્યાતા ગિરયો બહુપુણ્યદાઃ ॥ ૧૧॥

એતદુત્પન્નસરિતઃ શતશોઽથ સહસ્રશઃ ।
પાનાવગાહનસ્નાનદર્શનોત્કીર્તનૈરપિ ॥ ૧૨॥

નાશયન્તિ ચ પાપાનિ ત્રિવિધાનિ શરીરિણામ્ ।
તામ્રપર્ણી ચન્દ્રવશા કૃતમાલા વટોદકા ॥ ૧૩॥

વૈહાયસી ચ કાવેરી વેણા ચૈવ પયસ્વિની ।
તુઙ્ગભદ્રા કૃષ્ણવેણા શર્કરાવર્તકા તથા ॥ ૧૪॥

ગોદાવરી ભીમરથી નિર્વિન્ધ્યા ચ પયોષ્ણિકા ।
તાપી રેવા ચ સુરસા નર્મદા ચ સરસ્વતી ॥ ૧૫॥

ચર્મણ્વતી ચ સિન્ધુશ્ચ અન્ધશોણૌ મહાનદૌ ।
ઋષિકુલ્યા ત્રિસામા ચ વેદસ્મૃતિર્મહાનદી ॥ ૧૬॥

કૌશિકી યમુના ચૈવ મન્દાકિની દૃષદ્વતી ।
ગોમતી સરયૂ રોધવતી સપ્તવતી તથા ॥ ૧૭॥

સુષોમા ચ શતદ્રુશ્ચ ચન્દ્રભાગા મરુદ્વૃધા ।
વિતસ્તા ચ અસિક્ની ચ વિશ્વા ચેતિ પ્રકીર્તિતાઃ ॥ ૧૮॥

અસ્મિન્વર્ષે લબ્ધજન્મપુરુષૈઃ સ્વસ્વકર્મભિઃ ।
શુક્લલોહિતકૃષ્ણાખ્યૈર્દિવ્યમાનુષનારકાઃ ॥ ૧૯॥

ભવન્તિ વિવિધા ભોગાઃ સર્વેષાં ચ નિવાસિનામ્ ।
યથા વર્ણવિધાનેનાપવર્ગો ભવતિ સ્ફુટમ્ ॥ ૨૦॥

એતદેવ ચ વર્ષસ્ય પ્રાધાન્યં કાર્યસિદ્ધિતઃ ।
વદન્તિ મુનયો વેદવાદિનઃ સ્વર્ગવાસિનઃ ॥ ૨૧॥

અહો અમીષાં કિમકારિ શોભનં
પ્રસન્ન એષાં સ્વિદુત સ્વયં હરિઃ ।
યૈર્જન્મ લબ્ધં નૃષુ ભારતાજિરે
મુકુન્દસેવૌપયિકં સ્પૃહા હિ નઃ ॥ ૨૨॥

કિં દુષ્કરૈર્નઃ ક્રતુભિસ્તપોવ્રતૈ-
ર્દાનાદિભિર્વા દ્યુજયેન ફલ્ગુના ।
ન યત્ર નારાયણપદપઙ્કજ-
સ્મૃતિઃ પ્રમુષ્ટાતિશયેન્દ્રિયોત્સવાત્ ॥ ૨૩॥

કલ્પાયુષાં સ્થાનજયાત્પુનર્ભવા-
ત્ક્ષણાયુષાં ભારતભૂજયો વરમ્ ।
ક્ષણેન મર્ત્યેન કૃતં મનસ્વિનઃ
સંન્યસ્ય સંયાન્ત્યભયં પદં હરેઃ ॥ ૨૪॥

ન યત્ર વૈકુણ્ઠકથાસુધાપગા
ન સાધવો ભાગવતાસ્તદાશ્રયાઃ ।
ન યત્ર યજ્ઞેશમખા મહોત્સવાઃ
સુરેશલોકોઽપિ ન વૈ સ સેવ્યતામ્ ॥ ૨૫॥

પ્રાપ્તા નૃજાતિં ત્વિહ યે ચ જન્તવો
જ્ઞાનક્રિયાદ્રવ્યકલાપસમ્ભૃતામ્ ।
ન વૈ યતેરન્ન પુનર્ભવાય તે
ભૂયો વનૌકા ઇવ યાન્તિ બન્ધનમ્ ॥ ૨૬॥

યૈઃ શ્રદ્ધયા બર્હિષિ ભાગશો હવિ-
ર્નિરુપ્તમિષ્ટં વિધિમન્ત્રવસ્તુતઃ ।
એકઃ પૃથઙ્નામભિરાહુતો મુદા
ગૃહ્ણાતિ પૂર્ણઃ સ્વયમાશિષાં પ્રભુઃ ॥ ૨૭॥

સત્યં દિશત્યર્થિતમર્થિતો નૃણાં
નૈવાર્થદો યત્પુનરર્થિતા યતઃ ।
સ્વયં વિધત્તે ભજતામનિચ્છતા-
મિચ્છાપિધાનં નિજપાદપલ્લવમ્ ॥ ૨૮॥

(યદ્યત્ર નઃ સ્વર્ગસુખાવશેષિતં
સ્વિષ્ટસ્ય પૂર્તસ્ય કૃતસ્ય શોભનમ્ ।
તેનાબ્જનાભે સ્મૃતિમજ્જન્મ નઃ સ્યા-
દ્વર્ષે હરિર્ભજતાં શં તનોતિ ॥)
શ્રીનારાયણ ઉવાચ ।
એવં સ્વર્ગગતા દેવાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ।
પ્રવદન્તિ ચ માહાત્મ્યં ભારતસ્ય સુશોભનમ્ ॥ ૨૯॥

જમ્બુદ્વીપસ્ય ચાષ્ટૌ હિ ઉપદ્વીપાઃ સ્મૃતાઃ પરે ।
હયમાર્ગાન્વિશોધદ્ભિઃ સાગરૈઃ પરિકલ્પિતાઃ ॥ ૩૦॥

સ્વર્ણપ્રસ્થશ્ચન્દ્રશુક્ર આવર્તનરમાણકૌ ।
મન્દરોપાખ્યહરિણઃ પાઞ્ચજન્યસ્તથૈવ ચ ॥ ૩૧॥

સિંહલશ્ચૈવ લઙ્કેતિ ઉપદ્વીપાષ્ટકં સ્મૃતમ્ ।
જમ્બુદ્વીપસ્ય માનં હિ કીર્તિતં વિસ્તરેણ ચ ॥ ૩૨॥

અતઃ પરં પ્રવક્ષ્યામિ પ્લક્ષાદિદ્વીપષટ્કકમ્ ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને ભારતવર્ષવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૮.૧૧॥

## ૮.૧૨ દ્વાદશોઽધ્યાયઃ । ભુવનકોશવર્ણને પ્લક્ષદ્વીપકુશદ્વીપવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
જમ્બુદ્વીપો યથા ચાયં યત્પ્રમાણેન કીર્તિતઃ ।
તાવતા સર્વતઃ ક્ષારોદધિના પરિવેષ્ટિતઃ ॥ ૧॥

જમ્બ્વાખ્યેન યથા મેરુસ્તથા ક્ષારોદકેન ચ ।
ક્ષારોદધિસ્તુ દ્વિગુણઃ પ્લક્ષાખ્યેનોપવેષ્ટિતઃ ॥ ૨॥

યથૈવ પરિખા બાહ્યોપવનેન હિ વેષ્ટ્યતે ।

પ્લક્ષાખ્યશ્ચ સ્વયં જમ્બુપ્રમાણો દ્વીપરૂપધૃક્ ॥ ૩॥

હિરણ્મયોઽગ્નિસ્તત્રૈવ તિષ્ઠતીતિ વિનિશ્ચયઃ ।
પ્રિયવ્રતાત્મજસ્તત્ર સપ્તજિહ્વ ઇતિ સ્મૃતઃ ॥ ૪॥

અગ્નિસ્તદધિપસ્ત્વિધ્મજિહ્વઃ સ્વં દ્વીપમેવ ચ ।
વિભજ્ય સપ્તવર્ષાણિ સ્વપુત્રેભ્યો દદૌ વિભુઃ ॥ ૫॥

સ્વયમાત્મવિદાં માન્યાં યોગચર્યાં સમાશ્રિતઃ ।
તેનૈવ ચાત્મયોગેન ભગવન્તમુપાગતઃ ॥ ૬॥

શિવં ચ યવસં ભદ્રં શાન્તં ક્ષેમામૃતે તથા ।
અભયં ચેતિ સપ્તૈવ તદ્વર્ષાણિ સદેક્ષતામ્ ॥ ૭॥

તેષુ પ્રોક્તા નદીઃ સપ્ત ગિરયઃ સપ્ત ચૈવ હિ ।
અરુણા નૃમ્ણાઙ્ગિરસી સાવિત્રી સુપ્રભાતિકા ॥ ૮॥

ઋતમ્ભરા સત્યમ્ભરા ઇતિ નદ્યઃ પ્રકીર્તિતાઃ ।
મણિકૂટો વજ્રકૂટ ઇન્દ્રસેનસ્તથૈવ ચ ॥ ૯॥

જ્યોતિષ્માન્વૈ સુપર્ણશ્ચ હિરણ્યષ્ઠીવ એવ ચ ।
મેઘમાલ ઇતિ ખ્યાતાઃ પ્લક્ષદ્વીપસ્ય પર્વતાઃ ॥ ૧૦॥

નદીનાં જલમાત્રેણ દર્શનસ્પર્શનાદિભિઃ ।
નિર્ધૂતાશેષરજસો નિસ્તમસ્કાઃ પ્રજાસ્તથા ॥ ૧૧॥

હંસશ્ચૈવ પતઙ્ગશ્ચ ઊર્ધ્વાયન ઇતીવ ચ ।
સત્યાઙ્ગસંજ્ઞાશ્ચત્વારો વર્ણાઃ પ્લક્ષસ્ય દ્વીપકે ॥ ૧૨॥

સહસ્રાયુપ્રમાણાશ્ચ વિવિધોપમદર્શનાઃ ।
સ્વર્ગદ્વારં ત્રયીવિદ્યાવિધિનાર્કં યજન્તિ તે ॥ ૧૩॥

પ્રત્નસ્ય વિષ્ણો રૂપં ચ સત્યર્તસ્ય ચ બ્રહ્મણઃ ।
અમૃતસ્ય ચ મૃત્યોશ્ચ સૂર્યમાત્માનમીમહિ ॥ ૧૪॥

પ્લક્ષાદિષુ ચ સર્વેષુ પઞ્ચદ્વીપેષુ નારદ ।
આયુરિન્દ્રિયમોજશ્ચ બલં બુદ્ધિઃ સહોઽપિ ચ ॥ ૧૫॥

વિક્રમઃ સર્વલોકાનાં સિદ્ધિરૌત્પત્તિકી સદા ।
પ્લક્ષદ્વીપાત્પરં ચેક્ષુરસોદઃ સરિતામ્પતિઃ ॥ ૧૬॥

પ્લક્ષદ્વીપં સમગ્રં ચ પરિવાર્યાવતિષ્ઠતે ।
શાલ્મલાખ્યસ્તતો દ્વીપશ્ચાસ્માદ્ દ્વિગુણવિસ્તરઃ ॥ ૧૭॥

સમાનેન સુરોદેન સિન્ધુના પરિવેષ્ટિતઃ ।
યત્ર વૈ શાલ્મલીવૃક્ષઃ પ્લક્ષાયામઃ પ્રકીર્તિતઃ ॥ ૧૮॥

સ્થાનં તત્પક્ષિરાજસ્ય ગરુડસ્ય મહાત્મનઃ ।
તસ્ય દ્વીપસ્ય નાથો હિ યજ્ઞબાહુઃ પ્રિયવ્રતાત્ ॥ ૧૯॥

જાતઃ સ એવ સપ્તભ્યઃ સ્વપુત્રેભ્યો દદૌ ધરામ્ ।
તદ્વર્ષાણાં ચ નામાનિ કથિતાનિ નિબોધત ॥ ૨૦॥

સુરોચનં સૌમનસ્યં રમણં દેવવર્ષકમ્ ।
પારિભદ્રં તથા ચાપ્યાયનં વિજ્ઞાતનામકમ્ ॥ ૨૧॥

તેષુ વર્ષાદ્રયઃ સપ્ત સપ્તૈવ સરિતઃ સ્મૃતાઃ ।
સરસઃ શતશ‍ૃઙ્ગશ્ચ વામદેવશ્ચ કન્દકઃ ॥ ૨૨॥

કુમુદઃ પુષ્પવર્ષશ્ચ સહસ્રશ્રુતિરેવ ચ ।
એતે ચ પર્વતાઃ સપ્ત નદીનામાનિ ચોચ્યતે ॥ ૨૩॥

અનુમતિઃ સિનીવાલી સરસ્વતી કુહૂસ્તથા ।
રજની ચૈવ નન્દા ચ રાકેતિ પરિકીર્તિતાઃ ॥ ૨૪॥

તદ્વર્ષપુરુષાઃ સર્વે ચાતુર્વર્ણ્યસમાહ્વયાઃ ।
શ્રુતધરો વીર્યધરો વસુન્ધર ઇષુન્ધરઃ ॥ ૨૫॥

ભગવન્તં વેદમયં યજન્તે સોમમીશ્વરમ્ ।
સ્વગોભિઃ પિતૃદેવેભ્યો વિભજન્કૃષ્ણશુક્લયોઃ ॥ ૨૬॥

સર્વાસાં ચ પ્રજાનાં ચ રાજા સોમઃ પ્રસીદતુ ।
એવં સુરોદાદ્ દ્વિગુણઃ સ્વમાનેન પ્રકીર્તિતઃ ॥ ૨૭॥

ઘૃતોદેનાવૃતઃ સોઽયં કુશદ્વીપઃ પ્રકાશતે ।
યસ્મિન્નાસ્તે કુશસ્તમ્બો દ્વીપાખ્યાકારણો જ્વલન્ ॥ ૨૮॥

સ્વશષ્પરોચિષા કાષ્ઠા ભાસયન્પરિતિષ્ઠતે ।
હિરણ્યરેતાસ્તદ્વીપપતિઃ પ્રૈયવ્રત સ્વરાટ્ ॥ ૨૯॥

સ્વપુત્રેભ્યશ્ચ સપ્તભ્યસ્તદ્વીપં સપ્તધાભજત્ ।
વસુશ્ચ વસુદાનશ્ચ તથા દૃઢરુચિઃ પરઃ ॥ ૩૦॥

નાભિગુપ્તસ્તુત્યવ્રતૌ વિવિક્તનામદેવકૌ ।
તેષાં વર્ષેષુ સપ્તૈવ સીમાગિરિવરાઃ સ્મૃતાઃ ॥ ૩૧॥

નદ્યઃ સપ્તૈવ સન્તીહ તન્નામાનિ નિબોધત ।
ચક્રસ્તથા ચતુઃશૃઙ્ગઃ કપિલશ્ચિત્રકૂટકઃ ॥ ૩૨॥

દેવાનીકશ્ચોર્ધ્વરોમા દ્રવિણઃ સપ્ત પર્વતાઃ ।
રસકુલ્યા મધુકુલ્યા મિત્રવિન્દા તથૈવ ચ ॥ ૩૩॥

શ્રુતવિન્દા દેવગર્ભા ઘૃતચ્યુન્મન્દમાલિકે ।
યત્પયોભિઃ કુશદ્વીપવાસિનઃ સર્વ એવ તે ॥ ૩૪॥

કુશલઃ કોવિદશ્ચૈવાપ્યભિયુક્તસ્તથૈવ ચ ।
કુલકશ્ચેતિ સંજ્ઞાભિશ્ચતુર્વર્ણાઃ પ્રકીર્તિતાઃ ॥ ૩૫॥

જાતવેદસરૂપં તં દેવં કર્મજકૌશલૈઃ ।
યજન્તે દેવવર્યાભાઃ સર્વે સર્વવિદો જનાઃ ॥ ૩૬॥

પરસ્યબ્રહ્મણઃ સાક્ષાજ્જાતવેદોઽસિ હવ્યવાટ્ ।
દેવાનાં પુરુષાઙ્ગાનાં યજ્ઞેન પુરુષં યજ ।
એવં યજન્તે જ્વલનં સર્વે દ્વીપાધિવાસિનઃ ॥ ૩૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને પ્લક્ષદ્વીપકુશદ્વીપવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૮.૧૨॥

## ૮.૧૩ ત્રયોદશોઽધ્યાયઃ । ભુવનકોશવર્ણને ક્રૌઞ્ચશાકપુષ્કરદ્વીપવર્ણનમ્ ।

નારદ ઉવાચ ।
શિષ્ટદ્વીપપ્રમાણં ચ વદ સર્વાર્થદર્શન ।
યેન વિજ્ઞાતમાત્રેણ પરાનન્દમયો ભવેત્ ॥ ૧॥

શ્રીરાનારાયણ ઉવાચ ।
કુશદ્વીપસ્ય પરિતો ઘૃતોદાવરણં મહત્ ।
તતો બહિઃ ક્રૌઞ્ચદ્વીપો દ્વિગુણઃ સ્યાત્સ્વમાનતઃ ॥ ૨॥

ક્ષીરોદેનાવૃતો ભાતિ યસ્મિન્ક્રૌઞ્ચાદ્રિરસ્તિ ચ ।
નામનિર્વર્તકઃ સોઽયં દ્વીપસ્ય પરિવર્તતે ॥ ૩॥

યોઽસૌ ગુહસ્ય શક્ત્યા ચ ભિન્નકુક્ષિઃ પુરાભવત્ ।
ક્ષીરોદેનાસિચ્યમાનો વરુણેન ચ રક્ષિતઃ ॥ ૪॥

ઘૃતપૃષ્ઠો નામ યસ્ય વિભાતિ કિલ નાયકઃ ।
પ્રિયવ્રતાત્મજઃ શ્રીમાન્ સર્વલોકનમસ્કૃતઃ ॥ ૫॥

સ્વદ્વીપં તુ વિભજ્યૈવ સપ્તધા સ્વાત્મજાન્દદૌ ।
પુત્રનામસુ વર્ષેષુ વર્ષપાન્સન્નિવેશયન્ ॥ ૬॥

સ્વયં ભગવતસ્તસ્ય શરણં સઞ્જગામ હ ।
આમો મધુરુહશ્ચૈવ મેઘપૃષ્ઠઃ સુધામકઃ ॥ ૭॥

ભ્રાજિષ્ઠો લોહિતાર્ણશ્ચ વનસ્પતિરિતીવ ચ ।
નગા નદ્યશ્ચ સપ્તૈવ વિખ્યાતા ભુવિ સર્વતઃ ॥ ૮॥

શુક્લો વૈ વર્ધમાનશ્ચ ભોજનશ્ચોપબર્હણઃ ।
નન્દશ્ચ નન્દનઃ સર્વતોભદ્ર ઇતિ કીર્તિતાઃ ॥ ૯॥

અભયા અમૃતૌઘા ચાર્યકા તીર્થવતીતિ ચ ।
વૃત્તિરૂપવતી શુક્લા પવિત્રવતિકા તથા ॥ ૧૦॥

એતાસામુદકં પુણ્યં ચાતુર્વર્ણ્યેન પીયતે ।
પુરુષઋષભૌ તદ્વદ્ દ્રવિણાખ્યશ્ચ દેવકઃ ॥ ૧૧॥

એતે ચતુર્વર્ણજાતાઃ પુરુષા નિવસન્તિ હિ ।
તત્રત્યાઃ પુરુષા આપોમયં દેવમપાં પતિમ્ ॥ ૧૨॥

પૂર્ણેનાઞ્જલિના ભક્ત્યા યજન્તે વિવિધક્રિયાઃ ।
આપઃ પુરુષવીર્યાઃ સ્થ પુનન્તીર્ભૂર્ભુવઃ સ્વરઃ ॥ ૧૩॥

તા નઃ પુનીતામીવઘ્નીઃ સ્પૃશતામાત્મના ભુવઃ ।
ઇતિ મન્ત્રજપાન્તે ચ સ્તુવન્તિ વિવિધૈઃ સ્તવૈઃ ॥ ૧૪॥

એવં પરસ્તાત્ક્ષીરોદાત્પરિતશ્ચોપવેશિતઃ ।
દ્વાત્રિંશલ્લક્ષસઙ્ખ્યાકયોજનાયામમાશ્રિતઃ ॥ ૧૫॥

સ્વમાનેન ચ દ્વીપોઽયં દધિમણ્ડોદકેન ચ ।
શાકદ્વીપો વિશિષ્ટોઽયં યસ્મિચ્છાકો મહીરુહઃ ॥ ૧૬॥

સ્વક્ષેત્રવ્યપદેશસ્ય કારણં સ હિ નારદ ।
પ્રૈયવ્રતોઽધિપસ્તસ્ય મેધાતિથિરિતિ સ્મૃતઃ ॥ ૧૭॥

વિભજ્ય સપ્ત વર્ષાણિ પુત્રનામાનિ તેષુ ચ ।
સપ્ત પુત્રાન્નિજાન્ સ્થાપ્ય સ્વયં યોગગતિં ગતઃ ॥ ૧૮॥

પુરોજવો મનઃપૂર્વજવોઽથ પવમાનકઃ ।
ધૂમ્રાનીકશ્ચિત્રરેફો બહુરૂપોઽથ વિશ્વધૃક્ ॥ ૧૯॥

મર્યાદાગિરયઃ સપ્ત નદ્યઃ સપ્તૈવ કીર્તિતાઃ ।
ઈશાન ઊરુશૃઙ્ગોઽથ બલભદ્રઃ શતકેશરઃ ॥ ૨૦॥

સહસ્રસ્રોતકો દેવપાલોઽપ્યન્તે મહાશનઃ ।
એતેઽદ્રયઃ સપ્ત ચોક્તાઃ સરિન્નામાનિ સપ્ત ચ ॥ ૨૧॥

અનઘા પ્રથમાઽઽયુર્દા ઉભયસ્પૃષ્ટિરેવ ચ ।
અપરાજિતા પઞ્ચપદી સહસ્રશ્રુતિરેવ ચ ॥ ૨૨॥

તતો નિજધૃતિશ્ચોક્તાઃ સપ્ત નદ્યો મહોજ્જ્વલાઃ ।
તદ્વર્ષપુરુષાઃ સર્વે સત્યવ્રતક્રતુવ્રતૌ ॥ ૨૩॥

દાનવ્રતાનુવ્રતૌ ચ ચતુર્વર્ણા ઉદીરિતાઃ ।
ભગવન્તં પ્રાણવાયું પ્રાણાયામેન સંયુતાઃ ॥ ૨૪॥

યજન્તિ નિર્ધૂતરજસ્તમસઃ પરમં હરિમ્ ।
અન્તઃ પ્રવિશ્ય ભૂતાનિ યો બિભર્ત્યાત્મકેતુભિઃ ॥ ૨૫॥

અન્તર્યામીશ્વરઃ સાક્ષાત્પાતુ નો યદ્વશે ઇદમ્ ।
પરસ્તાદ્દધિમણ્ડોદાત્તતસ્તુ બહુવિસ્તરઃ ॥ ૨૬॥

પુષ્કરદ્વીપનામાયં શાકદ્વીપદ્વિસઙ્ગુણઃ ।
સ્વસમાનેન સ્વાદૂદકેનાયં પરિવેષ્ટિતઃ ॥ ૨૭॥

યત્રાસ્તે પુષ્કરં ભ્રાજદગ્નિચૂડાનિભાનિ ચ ।
પત્રાણિ વિશદાનીહ સ્વર્ણપત્રાયુતાયુતમ્ ॥ ૨૮॥

શ્રીમદ્ભગવતશ્ચેદમાસનં પરમેષ્ઠિનઃ ।
કલ્પિતં લોકગુરુણા સર્વલોકસિસૃક્ષયા ॥ ૨૯॥

તદ્દ્વીપ એક એવાયં માનસોત્તરનામકઃ ।
અર્વાચીનપરાચીનવર્ષયોરવધિર્ગિરિઃ ॥ ૩૦॥

ઉચ્છ્રાયાયામયોઃ સઙ્ખ્યાયુતયોજનસમ્મિતા ।

યત્ર દિક્ષુ ચ ચત્વારિ ચતસૃષુ પુરાણિ હ ॥ ૩૧॥

ઇન્દ્રાદિલોકપાલાનાં યદુપર્યર્કનિર્ગમઃ ।
મેરું પ્રદક્ષિણીકુર્વન્ ભાનુઃ પર્યેતિ યત્ર હિ ॥ ૩૨॥

સંવત્સરાત્મકં ચક્રં દેવાહોરાત્રતો ભ્રમન્ ।
પ્રૈયવ્રતોઽધિપો વીતિહોત્રઃ સ્વાત્મજકદ્વયમ્ ॥ ૩૩॥

વર્ષદ્વયે પરિસ્થાપ્ય વર્ષનામધરં ક્રમાત્ ।
રમણો ધાતકિશ્ચૈવ તત્તદ્વર્ષપતી ઉભૌ ॥ ૩૪॥

કૃતાઃ સ્વયં પૂર્વજવદ્ભગવદ્ભક્તિતત્પરાઃ ।
તદ્વર્ષપુરુષા બ્રહ્મરૂપિણં પરમેશ્વરમ્ ॥ ૩૫॥

સકર્મકેન યોગેન યજન્તિ પરિશીલિતાઃ ।
યત્તત્કર્મમયં લિઙ્ગ બ્રહ્મલિઙ્ગં જનોઽર્ચયેત્ ।
એકાન્તમદ્વયં શાન્તં તસ્મૈ ભગવતે નમઃ ॥ ૩૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણનં ક્રૌઞ્ચશાકપુષ્કરદ્વીપવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૮.૧૩॥

## ૮.૧૪ ચતુર્દશોઽધ્યાયઃ । સૂર્યગતિવર્ણનમ્ ।

નારાયણ ઉવાચ ।
તતઃ પરસ્તાદચલો લોકાલોકેતિ નામકઃ ।
અન્તરાલે ચ લોકાલોકયોર્યઃ પરિકલ્પિતઃ ॥ ૧॥

યાવદસ્તિ ચ દેવર્ષે હ્યન્તરં માનસોત્તરાત્ ।
સુમેરોસ્તાવતી શુદ્ધા કાઞ્ચની ભૂમિરસ્તિ હિ ॥ ૨॥

દર્પણોદરતુલ્યા સા સર્વપ્રાણિવિવર્જિતા ।
યસ્યાં પદાર્થઃ પ્રહિતો ન કિઞ્ચિત્પ્રત્યુદીયતે ॥ ૩॥

અતઃ સર્વપ્રાણિસઙ્ઘરહિતા સા ચ નારદ ।
લોકાલોક ઇતિ વ્યાખ્યા યદત્ર પરિકલ્પિતા ॥ ૪॥

લોકાલોકાન્તરે ચાસ્ય વર્તતે સર્વદા સ્થિતિઃ ।
ઈશ્વરેણ સ લોકાનાં ત્રયાણામન્તગઃ કૃતઃ ॥ ૫॥

સૂર્યાદીનાં ધ્રુવાન્તાનાં રશ્મયો યદ્વશાદિહ ।

અર્વાચીનાશ્ચ ત્રીઁલ્લોકાનાતન્વાનાઃ કદાપિ હિ ॥ ૬॥

પરાચીનત્વભાજો હિ ન ભવન્તિ ચ નારદ ।
તાવદુન્નહનાયામઃ પર્વતેન્દ્રો મહોદયઃ ॥ ૭॥

એતાવાઁલ્લોકવિન્યાસોઽયં સંસ્થામાનલક્ષણૈઃ ।
કવિભિઃ સ તુ પઞ્ચાશત્કોટિભિર્ગણિતસ્ય ચ ॥ ૮॥

ભૂગોલસ્ય ચતુર્થાંશો લોકાલોકાચલો મુને ।
તસ્યોપરિ ચતુર્દિક્ષુ બ્રહ્મણા ચાત્મયોનિના ॥ ૯॥

નિવેશિતા દિગ્ગજા યે તન્નામાનિ નિબોધત ।
ઋષભઃ પુષ્પચૂડોઽથ વામનોઽથાપરાજિતઃ ॥ ૧૦॥

એતે સમસ્તલોકસ્ય સ્થિતિહેતવ ઈરિતાઃ ।
તેષાં ચ સ્વવિભૂતીનાં બહુવીર્યોપબૃંહણમ્ ॥ ૧૧॥

વિશુદ્ધસત્ત્વં ચૈશ્વર્યં વર્ધયન્ભગવાન્ હરિઃ ।
આસ્તે સિદ્ધ્યષ્ટકોપેતો વિષ્વક્સેનાદિસંવૃતઃ ॥ ૧૨॥

નિજાયુધૈઃ પરિવૃતો ભુજદણ્ડૈઃ સમન્તતઃ ।
આસ્તે સકલલોકસ્ય સ્વસ્તયે પરમેશ્વરઃ ॥ ૧૩॥

આકલ્પમેવં વેષં સ ગતો વિષ્ણુઃ સનાતનઃ ।
સ્વમાયારચિતસ્યાસ્ય ગોપીથાયાત્મસાધનઃ ॥ ૧૪॥

યોઽન્તર્વિસ્તાર એતેન હ્યલોકપરિમાણકમ્ ।
વ્યાખ્યાતં યદ્બહિર્લોકાલોકાચલ ઇતીરણાત્ ॥ ૧૫॥

તતઃ પરસ્તાદ્યોગેશગતિં શુદ્ધા વદન્તિ હિ ।
અણ્ડમધ્યગતઃ સૂર્યો દ્યાવાભૂમ્યોર્યદન્તરમ્ ॥ ૧૬॥

સૂર્યાણ્ડગોલયોર્મધ્યે કોટ્યઃ સ્યુઃ પઞ્ચવિંશતિઃ ।
મૃતેઽણ્ડ એષ એતસ્મિઞ્જાતો માર્તણ્ડશબ્દભાક્ ॥ ૧૭॥

હિરણ્યગર્ભ ઇતિ યદ્ધિરણ્યાણ્ડસમુદ્ભવઃ ।
સૂર્યેણ હિ વિભજ્યન્તે દિશઃ ખં દ્યૌર્મહીભિદા ॥ ૧૮॥

સ્વર્ગાપવર્ગૌ નરકા રસૌકાંસિ ચ સર્વશઃ ।
દેવતિર્યઙ્મનુષ્યાણાં સરીસૃપસવીરુધામ્ ॥ ૧૯॥

સર્વજીવનિકાયાનાં સૂર્ય આત્મા દૃગીશ્વરઃ ।
એતાવાન્ભૂમણ્ડલસ્ય સન્નિવેશ ઉદાહૃતઃ ॥ ૨૦॥

એતેન હિ દિવો માનં વર્ણયન્તિ ચ તદ્વિદઃ ।
દ્વિદલાનાં ચ નિષ્પાવાદીનાં ચ દલયોર્યથા ॥ ૨૧॥

અન્તરેણ તયોરન્તરિક્ષં તદુભયસન્ધિતમ્ ।
યન્મધ્યગશ્ચ ભગવાન્ ભાનુર્વૈ તપતાં વરઃ ॥ ૨૨॥

આતપેન ત્રિલોકં ચ પ્રતપત્યેવ ભાસયન્ ।
ઉત્તરાયણમાસાદ્ય ગતિમાન્દ્યં વિતન્વતે ॥ ૨૩॥

આરોહણસ્થાનમસૌ ગત્વાહો દૈર્ઘ્યમાચરેત્ ।
દક્ષિણાયનમાસાદ્ય ગતિશૈઘ્ર્યં વિતન્વતે ॥ ૨૪॥

અવરોહસ્થાનમસૌ ગચ્છન્હ્રસ્વં દિનં ચરેત્ ।
વિષુવત્સંજ્ઞમાસાદ્ય ગતિસામ્યં વિતન્વતે ॥ ૨૫॥

સમસ્થાનમથાસાદ્ય દિનસામ્યં કરોતિ ચ ।
યદા ચ મેષતુલયોઃ સઞ્ચરેદ્ધિ દિવાકરઃ ॥ ૨૬॥

સમાનાનિ ત્વહોરાત્રાણ્યાતનોતિ ત્રયીમયઃ ।
વૃષાદિપઞ્ચસુ યદા રાશિષ્વર્કો વિરોચતે ॥ ૨૭॥

તદાહાનિ ચ વર્ધન્તે રાત્રયોઽપિ હ્રસન્તિ ચ ।
વૃશ્ચિકાદિષુ સૂર્યો હિ યદા સઞ્ચરતે રવિઃ ॥ ૨૮॥

તદાપીમાન્યહોરાત્રાણિ ભવન્તિ વિપર્યયાત્ ॥ ૨૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
સૂર્યગતિવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૮.૧૪॥

## ૮.૧૫ પઞ્ચદશોઽધ્યાયઃ । ભુવનકોશવર્ણને સૂર્યગતિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ ભાનોર્ગમનમુત્તમમ્ ।
શીઘ્રમન્દાદિગતિભિસ્ત્રિવિધં ગમનં રવેઃ ॥ ૧॥

સર્વગ્રહાણાં ત્રીણ્યેવ સ્થાનાનિ સુરસત્તમ ।
સ્થાનં જારદ્ગવં મધ્યં તથૈરાવતમુત્તરમ્ ॥ ૨॥

વૈશ્વાનરં દક્ષિણતો નિર્દિષ્ટમિતિ તત્ત્વતઃ ।
અશ્વિની કૃત્તિકા યામ્યા નાગવીથીતિ શબ્દિતા ॥ ૩॥

રોહિણ્યાર્દ્રા મૃગશિરો ગજવીથ્યભિધીયતે ।
પુષ્યાશ્લેષા તથાઽઽદિત્યા વીથી ચૈરાવતી સ્મૃતા ॥ ૪॥

એતાસ્તુ વીથયસ્તિસ્ર ઉત્તરો માર્ગ ઉચ્યતે ।
તથા દ્વે ચાપિ ફલ્ગુન્યૌ મઘા ચૈવાર્ષભી મતા ॥ ૫॥

હસ્તશ્ચિત્રા તથા સ્વાતી ગોવીથીતિ તુ શબ્દિતા ।
જ્યેષ્ઠા વિશાખાનુરાધા વીથી જારદ્ગવી મતા ॥ ૬॥

એતાસ્તુ વીથયસ્તિસ્રો મધ્યમો માર્ગ ઉચ્યતે ।
મૂલાષાઢોત્તરાષાઢા અજવીથ્યભિશબ્દિતા ॥ ૭॥

શ્રવણં ચ ધનિષ્ઠા ચ માર્ગી શતભિષક્ તથા ।
વૈશ્વાનરી ભાદ્રપદે રેવતી ચૈવ કીર્તિતા ॥ ૮॥

એતાસ્તુ વીથયસ્તિસ્રો દક્ષિણો માર્ગ ઉચ્યતે ।
ઉત્તરાયણમાસાદ્ય યુગાક્ષાન્તર્નિબદ્ધયોઃ ॥ ૯॥

કર્ષણં પાશયોર્વાયુબદ્ધયો રોહણં સ્મૃતમ્ ।
તદાભ્યન્તરગાન્મણ્ડલાદ્રથસ્ય ગતેર્ભવેત્ ॥ ૧૦॥

માન્દ્યં દિવસવૃદ્ધિશ્ચ જાયતે સુરસત્તમ ।
રાત્રિહ્રાસશ્ચ ભવતિ સૌમ્યાયનક્રમો હ્યયમ્ ॥ ૧૧॥

દક્ષિણાયનકે પાશે પ્રેરણાદવરોહણમ્ ।
બહિર્મણ્ડલવેશેન ગતિશૈઘ્ર્યં તદા ભવેત્ ॥ ૧૨॥

તદા દિનાલ્પતા રાત્રિવૃદ્ધિશ્ચ પરિકીર્તિતા ।
વૈષુવે પાશસામ્યાત્તુ સમાવસ્થાનતો રવેઃ ॥ ૧૩॥

મધ્યમણ્ડલવેશશ્ચ સામ્યં રાત્રિદિનાદિકે ।
આકૃષ્યેતે યદા તૌ તુ ધ્રુવેણ સમધિષ્ઠિતૌ ॥ ૧૪॥

તદાભ્યન્તરતઃ સૂર્યો ભ્રમતે મણ્ડલાનિ ચ ।
ધ્રુવેણ મુચ્યમાનેન પુના રશ્મિયુગેન તુ ॥ ૧૫॥

તથૈવ બાહ્યતઃ સૂર્યો ભ્રમતે મણ્ડલાનિ ચ ।

તસ્મિન્મેરૌ પૂર્વભાગે પુર્યૈન્દ્રી દેવધાનિકા ॥ ૧૬॥

દક્ષિણે વૈ સંયમની નામ યામ્યા મહાપુરી ।
પશ્ચાન્નિમ્લોચની નામ વારુણી વૈ મહાપુરી ॥ ૧૭॥

તદુત્તરે પુરી સૌમ્યા પ્રોક્તા નામ વિભાવરી ।
ઐન્દ્રપુર્યાં રવેઃ પ્રોક્ત ઉદયો બ્રહ્મવાદિભિઃ ॥ ૧૮॥

સંયમન્યાં ચ મધ્યાહ્ને નિમ્લોચન્યાં નિમીલનમ્ ।
વિભાવર્યાં નિશીથઃ સ્યાત્તિગ્માંશોઃ સુરપૂજિતઃ ॥ ૧૯॥

પ્રવૃત્તેશ્ચ નિમિત્તાનિ ભૂતાનાં તાનિ સર્વશઃ ।
મેરોશ્ચતુર્દિશં ભાનોઃ કીર્તિતાનિ મયા મુને ॥ ૨૦॥

મેરુસ્થાનાં સદા મધ્યં ગત એવ વિભાતિ હિ ।
સવ્યં ગચ્છન્દક્ષિણેન કરોતિ સ્વર્ણપર્વતમ્ ॥ ૨૧॥

ઉદયાસ્તમયે ચૈવ સર્વકાલં તુ સમ્મુખે ।
દિશાસ્વશેષાસુ તથા સુરર્ષે વિદિશાસુ ચ ॥ ૨૨॥

યૈર્યત્ર દૃશ્યતે ભાસ્વાન્સ તેષામુદયઃ સ્મૃતઃ ।
તિરોભાવં ચ યત્રૈતિ તત્રૈવાસ્તમનં રવેઃ ॥ ૨૩॥

નૈવાસ્તમનમર્કસ્ય નોદયઃ સર્વદા સતઃ ।
ઉદયાસ્તમનાખ્યં હિ દર્શનાદર્શનં રવેઃ ॥ ૨૪॥

શક્રાદીનાં પુરે તિષ્ઠન્સ્પૃશત્યેષ પુરત્રયમ્ ।
વિકર્ણૌ દ્વૌ વિકર્ણસ્થસ્ત્રીન્કોણાન્દ્વે પુરે તથા ॥ ૨૫॥

સર્વેષાં દ્વીપવર્ષાણાં મેરુરુત્તરતઃ સ્થિતઃ ।
યૈર્યત્ર દૃશ્યતે ભાનુઃ સૈવ પ્રાચીતિ ચોચ્યતે ॥ ૨૬॥

તદ્વામભાગતો મેરુર્વર્તતેતિ વિનિર્ણયઃ ।
યદિ ચૈન્દ્યાઃ પ્રચલતે ઘટિકા દશપઞ્ચભિઃ ॥ ૨૭॥

યામ્યાં તદા યોજનાનાં સપાદં કોટિયુગ્મકમ્ ।
સાર્ધદ્વાદશલક્ષાણિ પઞ્ચનેત્રસહસ્રકમ્ ॥ ૨૮॥

પ્રક્રામતિ સહસ્રાંશુઃ કાલમાર્ગપ્રદર્શકઃ ।
એવં તતો વારુણીં ચ સૌમ્યામૈન્દ્રીં સહસ્રદૃક્ ॥ ૨૯॥

પર્યેતિ કાલચક્રાત્મા દ્યુમણિઃ કાલબુદ્ધયે ।
તથા ચાન્યે ગ્રહાઃ સોમાદયો યે દિગ્વિચારિણઃ ॥ ૩૦॥

નક્ષત્રૈઃ સહ ચોદ્યન્તિ સહ ચાસ્તં વ્રજન્તિ તે ।
એવં મુહૂર્તેન રથો ભાનોરષ્ટશતાધિકમ્ ॥ ૩૧॥

યોજનાનાં ચતુસ્ત્રિંશલ્લક્ષાણિ ભ્રમતિ પ્રભુઃ ।
ત્રયીમયશ્ચતુર્દિક્ષુ પુરીષુ ચ સમીરણાત્ ॥ ૩૨॥

પ્રવહાખ્યાત્સદા કાલચક્રં પર્યેતિ ભાનુમાન્ ।
યસ્ય ચક્રં રથસ્યૈકં દ્વાદશારં ત્રિનાભિકમ્ ॥ ૩૩॥

ષણ્નેમિ કવયસ્તં ચ વત્સરાત્મકમૂચિરે ।
મેરુમૂર્ધનિ તસ્યાક્ષો માનસોત્તરપર્વતે ॥ ૩૪॥

કૃતેતરવિભાગો યઃ પ્રોતં તત્ર રથાઙ્ગકમ્ ।
તૈલકારકયન્ત્રેણ ચક્રસામ્યં પરિભ્રમન્ । ૩૫॥

માનસોત્તરનામ્નીહ ગિરૌ પર્યેતિ ચાંશુમાન્ ।
તસ્મિન્નક્ષે કૃતં મૂલં દ્વિતીયોઽક્ષો ધ્રુવે કૃતઃ ॥ ૩૬॥

તુર્યમાનેન તૈલસ્ય યન્ત્રાક્ષવદિતીરિતઃ ।
કૃતોપરિતનો ભાગઃ સૂર્યસ્ય જગતાં પતેઃ ॥ ૩૭॥

રથનીડસ્તુ ષટ્ત્રિંશલ્લક્ષયોજનમાયતઃ ।
તત્તુર્યભાગતઃ સોઽયં પરિણાહેન કીર્તિતઃ ॥ ૩૮॥

તાવાનર્કરથસ્યાત્ર યુગસ્તસ્મિન્હયાઃ શુભાઃ ।
સપ્તચ્છન્દોઽભિધાનાશ્ચ સૂરસૂતેન યોજિતાઃ ॥ ૩૯॥

વહન્તિ દેવમાદિત્યં લોકાનાં સુખહેતવે ।
પુરસ્તાત્સવિતુઃ સૂતોઽરુણઃ પશ્ચાન્નિયોજિતઃ ॥ ૪૦॥

સૌત્યે કર્મણિ સંયુક્તો વર્તતે ગરુડાગ્રજઃ ।
તથૈવ બાલખિલ્યાખ્યા ઋષયોઽઙ્ગુષ્ઠપર્વકાઃ ॥ ૪૧॥

પ્રમાણેન પરિખ્યાતાઃ ષષ્ટિસાહસ્રસઙ્ખ્યકાઃ ।
સ્તુવન્તિ પુરતઃ સૂર્યં સૂક્તવાક્યૈઃ સુશોભનૈઃ ॥ ૪૨॥

તથા ચાન્યે ચ ઋષયો ગન્ધર્વા અપ્સરોરગાઃ ।
ગ્રામણ્યો યાતુધાનાશ્ચ દેવાઃ સર્વે પરેશ્વરમ્ ॥ ૪૩॥

એકૈકશઃ સપ્ત સપ્ત માસિ માસિ વિરોચનમ્ ।
સાર્ધલક્ષોત્તરં કોટિનવકં ભૂમિમણ્ડલમ્ ॥ ૪૪॥

દ્વિસહસ્રં યોજનાનાં સ ગવ્યૂત્યુત્તરં ક્ષણાત્ ।
પર્યેતિ દેવદેવેશો વિશ્વવ્યાપી નિરન્તરમ્ ॥ ૪૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ભુવનકોશવર્ણને સૂર્યગતિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૮.૧૫॥

## ૮.૧૬ ષોડશોઽધ્યાયઃ । સોમાદિગતિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથાતઃ શ્રૂયતાં ચિત્રં સોમાદીનાં ગમાદિકમ્ ।
તદ્ગત્યનુસૃતા નૃણાં શુભાશુભનિદર્શના ॥ ૧॥

યથા કુલાલચક્રેણ ભ્રમતા ભ્રમતાં સહ ।
તદાશ્રયાણાં ચ ગતિરન્યા કીટાદિનાં ભવેત્ ॥ ૨॥

એવં હિ રાશિવૃન્દેન કાલચક્રેણ તેન ચ ।
મેરું ધ્રુવં ચ સરતાં પ્રાદક્ષિણ્યેન સર્વદા ॥ ૩॥

ગ્રહાણાં ભાનુમુખ્યાનાં ગતિરન્યૈવ દૃશ્યતે ।
નક્ષત્રાન્તરગામિત્વાદ્ભાન્તરે ગમનં તથા ॥ ૪॥

ગતિદ્વયં ચાવિરુદ્ધં સર્વત્રૈષ વિનિર્ણયઃ ।
સ એવ ભગવાનાદિપુરુષો લોકભાવનઃ ॥ ૫॥

નારાયણોઽખિલાધારો લોકાનાં સ્વસ્તયે ભ્રમન્ ।
કર્મશુદ્ધિનિમિત્તં તુ આત્માનં વૈ ત્રયીમયમ્ ॥ ૬॥

કવિભિશ્ચૈવ વેદેન વિજિજ્ઞાસ્યોઽર્કધાભવત્ ।
ષટ્સુ ક્રમેણ ઋતુષુ વસન્તાદિષુ ચ સ્વયમ્ ॥ ૭॥

યથોપજોષમૃતુજાન્ ગુણાન્ વૈ વિદધાતિ ચ ।
તમેનં પુરુષાઃ સર્વે ત્રય્યા ચ વિદ્યયા સદા ॥ ૮॥

વર્ણાશ્રમાચારપથા તથામ્નાતૈશ્ચ કર્મભિઃ ।
ઉચ્ચાવચૈઃ શ્રદ્ધયા ચ યોગાનાં ચ વિતાનકૈઃ ॥ ૯॥

અઞ્જસા ચ યજન્તે યે શ્રેયો વિન્દન્તિ તે મતમ્ ।
અથૈષ આત્મા લોકાનાં દ્યાવાભૂમ્યન્તરેણ ચ ॥ ૧૦॥

કાલચક્રગતો ભુઙ્ક્તે માસાન્દ્વાદશરાશિભિઃ ।
સંવત્સરસ્યાવયવાન્માસઃ પક્ષદ્વયં દિવા ॥ ૧૧॥

નક્તં ચેતિ સ પાદર્ક્ષદ્વયમિત્યુપદિશ્યતે ।
યાવતા ષષ્ઠમંશં સ ભુઞ્જીત ઋતુરુચ્યતે ॥ ૧૨॥

સંવત્સરસ્યાવયવઃ કવિભિશ્ચોપવર્ણિતઃ ।
યાવતાર્ધેન ચાકાશવીથ્યાં પ્રચરતે રવિઃ ॥ ૧૩॥

તં પ્રાક્તના વર્ણયન્તિ અયનં મુનિપૂજિતાઃ ।
અથ યાવન્નભોમણ્ડલં સહ પ્રતિગચ્છતિ ॥ ૧૪॥

કાર્ત્સ્ન્યેન સહ ભુઞ્જીત કાલં તં વત્સરં વિદુઃ ।
સંવત્સરં પરિવત્સરમિડાવત્સરમેવ ચ ॥ ૧૫॥

અનુવત્સરમિદ્વત્સરમિતિ પઞ્ચકમીરિતમ્ ।
ભાનોર્માન્દ્યશૈઘ્ર્યસમગતિભિઃ કાલવિત્તમૈઃ ॥ ૧૬॥

એવં ભાનોર્ગતિઃ પ્રોક્તા ચન્દ્રાદીનાં નિબોધત ।
એવં ચન્દ્રોઽર્કરશ્મિભ્યો લક્ષયોજનમૂર્ધ્વતઃ ॥ ૧૭॥

ઉપલભ્યમાનો મિત્રસ્ય સંવત્સરભુજિં ચ સઃ ।
પક્ષાભ્યાં ચૌષધીનાથો ભુઙ્ક્તે માસભુજિં ચ સઃ ॥ ૧૮॥

સપાદમાભ્યાં દિવસભુક્તિં પક્ષભુજિં ચરેત્ ।
એવં શીઘ્રગતિઃ સોમો ભુઙ્ક્તે નૂનં ભચક્રકમ્ ॥ ૧૯॥

પૂર્યમાણકલાભિશ્ચામરાણાં પ્રીતિમાવહન્ ।
ક્ષીયમાણકલાભિશ્ચ પિતૃણાં ચિત્તરઞ્જકઃ ॥ ૨૦॥

અહોરાત્રાણિ તન્વાનઃ પૂર્વાપરસુધસ્રકૈઃ ।
સર્વજીવનિકાયસ્ય પ્રાણો જીવઃ સ એવ હિ ॥ ૨૧॥

ભુઙ્ક્તે ચૈકૈકનક્ષત્રં મુહૂર્તત્રિંશતા વિભુઃ ।
સ એવ ષોડશકલઃ પુરુષોઽનાદિસત્તમઃ ॥ ૨૨॥

મનોમયોઽપ્યન્નમયોઽમૃતધામા સુધાકરઃ ।
દેવપિતૃમનુષ્યાદિસરીસૃપસવીરુધામ્ ॥ ૨૩॥

પ્રાણાપ્યાયનશીલત્વાત્સ સર્વમય ઉચ્યતે ।
તતો ભચક્રં ભ્રમતિ યોજનાનાં ત્રિલક્ષતઃ ॥ ૨૪॥

મેરુપ્રદક્ષિણેનૈવ યોજિતં ચેશ્વરેણ તુ ।
અષ્ટાવિંશતિસઙ્ખ્યાનિ ગણિતાનિ સહાભિજિત્ ॥ ૨૫॥

તતઃ શુક્રો દ્વિલક્ષેણ યોજનાનામથોપરિ ।
પુરઃ પશ્ચાત્સહૈવાસાવર્કસ્ય પરિવર્તતે ॥ ૨૬॥

શીઘ્રમન્દસમાનાભિર્ગતિભિર્વિચરન્વિભુઃ ।
લોકાનામનુકૂલોઽયં પ્રાયઃ પ્રોક્તઃ શુભાવહઃ ॥ ૨૭॥

વૃષ્ટિવિષ્ટમ્ભશમનો ભાર્ગવઃ સર્વદા મુને ।
શુક્રાદ્ બુધઃ સમાખ્યાતો યોજનાનાં દ્વિલક્ષતઃ ॥ ૨૮॥

શીઘ્રમન્દસમાનાભિર્ગતિભિઃ શુક્રવત્સદા ।
યદાર્કાદ્વ્યતિરિચ્યેત સૌમ્યઃ પ્રાયેણ તત્ર તુ ॥ ૨૯॥

અતિવાતાભ્રપાતાનાં વૃષ્ટ્યાદિભયસૂચકઃ ।
ઉપરિષ્ટાત્તતો ભૌમો યોજનાનાં દ્વિલક્ષતઃ ॥ ૩૦॥

પક્ષૈસ્ત્રિભિસ્ત્રિભિઃ સોઽયં ભુઙ્ક્તે રાશીનથૈકશઃ ।
દ્વાદશાપિ ચ દેવર્ષે યદિ વક્રો ન જાયતે ॥ ૩૧॥

પ્રાયેણાશુભકૃત્સોઽયં ગ્રહૌઘાનાં ચ સૂચકઃ ।
નતો દ્વિલક્ષમાનેન યોજનાનાં ચ ગીષ્પતિઃ ॥ ૩૨॥

એકૈકસ્મિન્નથો રાશૌ ભુઙ્ગે સંવત્સરં ચરન્ ।
યદિ વક્રો ભવેન્નૈવાનુકૂલો બ્રહ્મવાદિનામ્ ॥ ૩૩॥

તતઃ શનૈશ્ચરો ઘોરો લક્ષદ્વયપરો મિતઃ ।
યોજનૈઃ સૂર્યપુત્રોઽયં ત્રિંશન્માસૈઃ પરિભ્રમન્ ॥ ૩૪॥

એકૈકરાશૌ પર્યેતિ સર્વાન્ રાશીન્મહાગ્રહઃ ।
સર્વેષામશુભો મન્દઃ પ્રોક્તઃ કાલવિદાં વરૈઃ ॥ ૩૫॥

તત ઉત્તરતઃ પ્રોક્તમેકાદશસુલક્ષકૈઃ ।
યોજનૈઃ પરિસઙ્ખ્યાતં સપ્તર્ષીણાં ચ મણ્ડલમ્ ॥ ૩૬॥

લોકાનાં શં ભાવયન્તો મુનયઃ સપ્ત તે મુને ।

યત્તદ્વિષ્ણુપદં સ્થાનં દક્ષિણં પ્રક્રમન્તિ તે ॥ ૩૭

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
સોમાદિગતિવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૮.૧૬॥

## ૮.૧૭ સપ્તદશોઽધ્યાયઃ । ધ્રુવમણ્ડલસંસ્થાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથર્ષિમણ્ડલાદૂર્ધ્વં યોજનાનાં પ્રમાણતઃ ।
લક્ષૈસ્ત્રયોદશમિતૈઃ પરમં વૈષ્ણવં પદમ્ ॥ ૧॥

મહાભાગવતઃ શ્રીમાન્ વર્તતે લોકવન્દિતઃ ।
ઔત્તાનપાદિરિન્દ્રેણ વહ્નિના કશ્યપેન ચ ॥ ૨॥

ધર્મેણ સહ ચૈવાસ્તે સમકાલયુજા ધ્રુવઃ ।
બહુમાનં દક્ષિણતઃ કુર્વદ્ભિઃ પ્રેક્ષકૈઃ સદા ॥ ૩॥

આજીવ્યઃ કલ્પજીવિનામુપાસ્તે ભગવત્પદમ્ ।
જ્યોતિર્ગણાનાં સર્વેષાં ગ્રહનક્ષત્રભાદિનામ્ ॥ ૪॥

કાલેનાનિમિષેણાયં ભ્રામ્યતાં વ્યક્તરંહસા ।
અવષ્ટમ્ભસ્થાણુરિવ વિહિતશ્ચેશ્વરેણ સઃ ॥ ૫॥

ભાસતે ભાસયન્ભાસા સ્વીયયા દેવપૂજિતઃ ।
મેઢિસ્તમ્ભે યથા યુક્તાઃ પશવઃ કર્ષણાર્થકાઃ ॥ ૬॥

મણ્ડલાનિ ચરન્તીમે સવનત્રિતયેન ચ ।
એવં ગ્રહાદયઃ સર્વે ભગણાદ્યા યથાક્રમમ્ ॥ ૭॥

અન્તર્બહિર્વિભાગેન કાલચક્રે નિયોજિતાઃ ।
ધ્રુવમેવાવલમ્બ્યાશુ વાયુનોદીરિતાશ્ચ તે ॥ ૮॥

આકલ્પાન્તં ચ ક્રમન્તિ ખે શ્યેનાદ્યાઃ ખગા ઇવ ।
કર્મસારથયો વાયુવશગાઃ સર્વ એવ તે ॥ ૯॥

એવં જ્યોતિર્ગણાઃ સર્વે પ્રકૃતેઃ પુરુષસ્ય ચ ।
સંયોગાનુગૃહીતાસ્તે ભૂમૌ ન નિપતન્તિ ચ ॥ ૧૦॥

જ્યોતિશ્ચક્રં કેચિદેતચ્છિશુમારસ્વરૂપકમ્ ।
સોપયોગં ભગવતો યોગધારણકર્મણિ ॥ ૧૧॥

યસ્યાર્વાક્શિરસઃ કુણ્ડલીભૂતવપુષો મુને ।
પુચ્છાગ્રે કલ્પિતો યોઽયં ધ્રુવ ઉત્તાનપાદજઃ ॥ ૧૨॥

લાઙ્ગૂલેઽસ્ય ચ સમ્પ્રોક્તઃ પ્રજાપતિરકલ્મષઃ ।
અગ્નિરિન્દ્રશ્ચ ધર્મશ્ચ તિષ્ઠન્તે સુરપૂજિતાઃ ॥ ૧૩॥

ધાતા વિધાતા પુચ્છાન્તે કટ્યાં સપ્તર્ષયસ્તતઃ ।
દક્ષિણાવર્તભોગેન કુણ્ડલાકારમીયુષઃ ॥ ૧૪॥

ઉત્તરાયણભાનીહ દક્ષપાર્શ્વેઽર્પિતાનિ ચ ।
દક્ષિણાયનભાનીહ સવ્યે પાર્શ્વેઽર્પિતાનિ ચ ॥ ૧૫॥

કુણ્ડલાભોગવેશસ્ય પાર્શ્વયોરુભયોરપિ ।
સમસઙ્ખ્યાશ્ચાવયવા ભવન્તિ કજનન્દન ॥ ૧૬॥

અજવીથી પૃષ્ઠભાગે આકાશસરિદૌદરે ।
પુનર્વસુશ્ચ પુષ્યશ્ચ શ્રોણ્યૌ દક્ષિણવામયોઃ ॥ ૧૭॥

આર્દ્રાશ્લેષે પશ્ચિમયોઃ પાદયોર્દક્ષવામયોઃ ।
અભિજિચ્ચોત્તરાષાઢા નાસયોર્દક્ષવામયોઃ ॥ ૧૮॥

યથાસઙ્ખ્યં ચ દેવર્ષે શ્રુતિશ્ચ જલભં તથા ।
કલ્પિતે કલ્પનાવિદ્ભિર્નેત્રયોર્દક્ષવામયોઃ ॥ ૧૯॥

ધનિષ્ઠા ચૈવ મૂલં ચ કર્ણયોર્દક્ષવામયોઃ ।
મઘાદીન્યષ્ટભાનીહ દક્ષિણાયનગાનિ ચ ॥ ૨૦॥

યુઞ્જીત વામપાર્શ્વીયવઙ્ક્રિષુ ક્રમતો મુને ।
તથૈવ મૃગશીર્ષાદીન્યુદગ્ભાનિ ચ યાનિ હિ ॥ ૨૧॥

દક્ષપાર્શ્વે વઙ્ક્રિકેષુ પ્રાતિલોમ્યેન યોજયેત્ ।
શતતારા તથા જ્યેષ્ઠા સ્કન્ધયોર્દક્ષવામયોઃ ॥ ૨૨॥

અગસ્તિશ્ચોત્તરહનાવધરાયાં હનૌ યમઃ ।
મુખેષ્વઙ્ગારકઃ પ્રોક્તો મન્દઃ પ્રોક્ત ઉપસ્થકે ॥ ૨૩॥

બૃહસ્પતિશ્ચ કકુદિ વક્ષસ્યર્કો ગ્રહાધિપઃ ।
નારાયણશ્ચ હૃદયે ચન્દ્રો મનસિ તિષ્ઠતિ ॥ ૨૪॥

સ્તનયોરશ્વિનૌ નાભ્યામુશનાઃ પરિકીર્તિતઃ ।

બુધઃ પ્રાણાપાનયોશ્ચ ગલે રાહુશ્ચ કેતવઃ ॥ ૨૫॥

સર્વાઙ્ગેષુ તથા રોમકૂપે તારાગણાઃ સ્મૃતાઃ ।
એતદ્ભગવતો વિષ્ણોઃ સર્વદેવમયં વપુઃ ॥ ૨૬॥

સન્ધ્યાયાં પ્રત્યહં ધ્યાયેત્પ્રયતો વાગ્યતો મુનિઃ ।
નિરીક્ષમાણશ્ચોત્તિષ્ઠેન્મન્ત્રેણાનેન ધીશ્વરઃ ॥ ૨૭॥

નમો જ્યોતિર્લોકાય કાલાયાનિમિષાં
પતયે મહાપુરુષાયાભિધીમહીતિ ॥ ૨૮॥

ગ્રહર્ક્ષતારામયમાધિદૈવિકં
પાપાપહં મન્ત્રકૃતાં ત્રિકાલમ્ ।
નમસ્યતઃ સ્મરતો વા ત્રિકાલં
નશ્યેત તત્કાલજમાશુ પાપમ્ ॥ ૨૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ધ્રુવમણ્ડલસંસ્થાનવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૮.૧૭॥

## ૮.૧૮ અષ્ટાદશોઽધ્યાયઃ । રાહુમણ્ડલાદ્યવસ્થાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અધસ્તાત્સવિતુઃ પ્રોક્તમયુતં રાહુમણ્ડલમ્ ।
નક્ષત્રવચ્ચરતિ ચ સૈંહિકેયોઽતદર્હણઃ ॥ ૧॥

સૂર્યાચન્દ્રમસોરેવ મર્દનઃ સિંહિકાસુતઃ ।
અમરત્વં ચ ખેટત્વં લેભે યો વિષ્ણ્વનુગ્રહાત્ ॥ ૨॥

યદદસ્તરણેર્બિમ્બં તપતો યોજનાયુતમ્ ।
તચ્છાદકોઽસુરો જ્ઞેયોઽપ્યર્કસાહસ્રવિસ્તરમ્ ॥ ૩॥

ત્રયોદશસહસ્રં તુ સોમસ્યાચ્છાદકો ગ્રહઃ ।
યઃ પર્વસમયે વૈરાનુબન્ધી છાદકોઽભવત્ ॥ ૪॥

સૂર્યાચન્દ્રમસોર્દૂરાદ્ભવેચ્છાદનકારકઃ ।
તન્નિશમ્યોભયત્રાપિ વિષ્ણુના પ્રેરિતં સ્વકમ્ ॥ ૫॥

ચક્રં સુદર્શનં નામ જ્વાલામાલાતિભીષણમ્ ।
તત્તેજસા દુઃસહેન સમન્તાત્પરિવારિતમ્ ॥ ૬॥

મુહૂર્તો દ્વિજમાનસ્તુ દૂરાચ્ચકિતમાનસઃ ।
આરાન્નિવર્તતે સોઽયમુપરાગ ઇતીવ હ ॥ ૭॥

ઉચ્યતે લોકમધ્યે તુ દેવર્ષે અવબુધ્યતામ્ ।
તતોઽધસ્તાત્સમાખ્યાતા લોકાઃ પરમપાવનાઃ ॥ ૮॥

સિદ્ધાનાં ચારણાનાં ચ વિદ્યાધ્રાણાં ચ સત્તમ ।
યોજનાયુતવિખ્યાતા લોકાઃ પુણ્યનિષેવિતાઃ ॥ ૯॥

તતોઽપ્યધસ્તાદ્દેવર્ષે યક્ષાણાં ચ સરક્ષસામ્ ।
પિશાચપ્રેતભૂતાનાં વિહારાજિરમુત્તમમ્ ॥ ૧૦॥

અન્તરિક્ષં ચ તત્પ્રોક્તં યાવદ્વાયુઃ પ્રવાતિ હિ ।
યાવન્મેઘાસ્તતોધન્તિ તત્પ્રોક્તં જ્ઞાનકોવિદૈઃ ॥ ૧૧॥

તતોઽધસ્તાદ્યોજનાનાં શતં યાવદ્ દ્વિજોત્તમ ।
પૃથિવી પરિસઙ્ખ્યાતા સુપર્ણશ્યેનસારસાઃ ॥ ૧૨॥

હંસાદયઃ પ્રોત્પતન્તિ પાર્થિવાઃ પૃથિવીભવાઃ ।
ભૂસન્નિવેશાવસ્થાનં યથાવદુપવર્ણિતમ્ ॥ ૧૩॥

અધસ્તાદવનેઃ સપ્ત દેવર્ષે વિવરાઃ સ્મૃતાઃ ।
એકૈકશો યોજનાનામાયામોચ્છ્રાયતઃ પુનઃ ॥ ૧૪॥

અયુતાન્તરવિખ્યાતાઃ સર્વર્તુસુખદાયકાઃ ।
અતલં પ્રથમં પ્રોક્તં દ્વિતીયં વિતલં તથા ॥ ૧૫॥

તૃતીયં સુતલં પ્રોક્તં ચતુર્થં વૈ તલાતલમ્ ।
મહાતલં પઞ્ચમં ચ ષષ્ઠં પ્રોક્તં રસાતલમ્ ॥ ૧૬॥

સપ્તમં વિપ્ર પાતાલં સપ્તૈતે વિવરાઃ સ્મૃતાઃ ।
એતેષુ બિલસ્વર્ગેષુ દિવોઽપ્યધિકમેવ ચ ॥ ૧૭॥

કામભોગૈશ્વર્યસુખસમૃદ્ધભુવનેષુ ચ ।
નિત્યોદ્યાનવિહારેષુ સુખાસ્વાદઃ પ્રવર્તતે ॥ ૧૮॥

દૈત્યાશ્ચ કાદ્રવેયાશ્ચ દાનવા બલશાલિનઃ ।
નિત્યપ્રમુદિતા રક્તાઃ કલત્રાપત્યબન્ધુભિઃ ॥ ૧૯॥

સુહૃદ્ભિરનુજીવાદ્યૈઃ સંયુતાશ્ચ ગૃહેશ્વરાઃ ।
ઈશ્વરાદપ્રતિહતકામા માયાવિનશ્ચ તે ॥ ૨૦॥

નિવસન્તિ સદા હૃષ્ટાઃ સર્વર્તુસુખસંયુતાઃ ।
મયેન માયાવિભુના યેષુ યેષુ ચ નિર્મિતાઃ ॥ ૨૧॥

પુરઃ પ્રકામશો ભક્તા મણિપ્રવરશાલિનઃ ।
વિચિત્રભવનાટ્ટાલગોપુરાદ્યાઃ સહસ્રશઃ ॥ ૨૨॥

સભાચત્વરચૈત્યાદિશોભાઢ્યાઃ સુરદુર્લભાઃ ।
નાગાસુરાણાં મિથુનૈઃ સપારાવતસારિકૈઃ ॥ ૨૩॥

કીર્ણકૃત્રિમભૂમિશ્ચ વિવરેશગૃહોત્તમૈઃ ।
અલઙ્કૃતાશ્ચકાસન્તિ ઉદ્યાનાનિ મહાન્તિ ચ ॥ ૨૪॥

મનઃપ્રસન્નકારીણિ ફલપુષ્પવિશાલિભિઃ ।
લલનાનાં વિલાસાર્હસ્થાનૈઃ શોભિતભાઞ્જિ ચ ॥ ૨૫॥

નાનાવિહઙ્ગમવ્રાતસંયુક્તજલરાશિભિઃ ।
સ્વચ્છાર્ણપૂરિતહ્રદૈઃ પાઠીનસમલઙ્કૃતૈઃ ॥ ૨૬॥

જલજન્તુક્ષુબ્ધનીરનીરજાતૈરનેકશઃ ।
કુમુદોત્પલકહ્લારનીલરક્તોત્પલૈસ્તથા ॥ ૨૭॥

તેષુ કૃતનિકેતાનાં વિહારૈઃ સઙ્કુલાનિ ચ ।
ઇન્દ્રિયોત્સવકારૈશ્ચ તથૈવ વિવિધૈઃ સ્વરૈઃ ॥ ૨૮॥

અમરાણાં ચ પરમાં શ્રિયં ચાતિશયન્તિ ચ ।
યત્ર નૈવ ભયં ક્વાપિ કાલાઙ્ગૈર્દિનરાત્રિભિઃ ॥ ૨૯॥

યત્રાહિપ્રવરાણાં ચ શિરઃસ્થૈર્મણિરશ્મિભિઃ ।
નિત્યં તમઃ પ્રબાધ્યેત સદા પ્રસ્ફુટકાન્તિભિઃ ॥ ૩૦॥

ન વા એતેષુ વસતાં દિવ્યૌષધિરસાયનૈઃ ।
રસાન્નપાનસ્નાનાદ્યૈર્નાધયો ન ચ વ્યાધયઃ ॥ ૩૧॥

વલીપલિતજીર્ણત્વવૈવર્ણ્યસ્વેદગન્ધતાઃ ।
અનુત્સાહવયોઽવસ્થા ન બાધન્તે કદાચન ॥ ૩૨॥

કલ્યાણાનાં સદા તેષાં ન ચ મૃત્યુભયં કુતઃ ।
ભગવત્તેજસોઽન્યત્ર ચક્રાખ્યૈવ સુદર્શનાત્ ॥ ૩૩॥

યસ્મિન્પ્રવિષ્ટે દૈતેયવધૂનાં ગર્ભરાશયઃ ।

પ્રાયો ભયાત્પતન્ત્યેવ સ્રવન્તિ બ્રહ્મપુત્રક ॥ ૩૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
રાહુમણ્ડલાધવસ્થાનવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૮.૧૮॥

## ૮.૧૯ એકોનવિંશોઽધ્યાયઃ । અતલવિતલસુતલલોકવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
પ્રથમે વિવરે વિપ્ર અતલાખ્યે મનોરમે ।
મયપુત્રો બલો નામ વર્તતેઽખર્વગર્વકૃત્ ॥ ૧॥

ષણ્ણવત્યો યેન સૃષ્ટા માયાઃ સર્વાર્થસાધિકાઃ ।
માયાવિનો યાશ્ચ સદ્યો ધારયન્તિ ચ કાશ્ચન ॥ ૨॥

જૃમ્ભમાણસ્ય યસ્યૈવ બલસ્ય બલશાલિનઃ ।
સ્ત્રીગણા ઉપપદ્યન્તે ત્રયોલોકવિમોહનાઃ ॥ ૩॥

પુંશ્ચલ્યશ્ચૈવ સ્વૈરિણ્યઃ કામિન્યશ્ચેતિ વિશ્રુતાઃ ।
યા વૈ બિલાયનં પ્રેક્ષ્ય પ્રવિષ્ટં પુરુષં રહઃ ॥ ૪॥

રસેન હાટકાખ્યેન સાધયિત્વા પ્રયત્નતઃ ।
સ્વવિલાસાવલોકાનુરાગસ્મિતવિગૂહનૈઃ ॥ ૫॥

સંલાપવિભ્રમાદ્યૈશ્ચ રમયન્ત્યપિ તાઃ સ્ત્રિયઃ ।
યસ્મિન્નુપયુક્તે જનો મનુતે બહુધા સ્વયમ્ ॥ ૬॥

ઈશ્વરોઽહમહં સિદ્ધો નાગાયુતબલો મહાન્ ।
આત્માનં મન્યમાનઃ સન્મદાન્ધ ઇવ કથ્યતે ॥ ૭॥

એવં પ્રોક્તા સ્થિતિશ્ચાત્ર અતલસ્ય ચ નારદ ।
દ્વિતીયવિવરસ્યાત્ર વિતલસ્ય નિબોધત ॥ ૮॥

ભૂતલાધસ્તલે ચૈવ વિતલે ભગવાન્ભવઃ ।
હાટકેશ્વરનામાયં સ્વપાર્ષદગણૈર્વૃતઃ ॥ ૯॥

પ્રજાપતિકૃતસ્યાપિ સર્ગસ્ય બૃંહણાય ચ ।
ભવાન્યા મિથુનીભૂય આસ્તે દેવાધિપૂજિતઃ ॥ ૧૦॥

ભવયોર્વીર્યસમ્ભૂતા હાટકી સરિદુત્તમા ।
સમિદ્ધો મરુતા વહ્નિરોજસા પિબતીવ હિ ॥ ૧૧॥

તન્નિષ્ઠ્યૂતં હાટકાખ્યં સુવર્ણં દૈત્યવલ્લભમ્ ।
દૈત્યાઙ્ગના ભૂષણાર્હં સદા તં ધારયન્તિ હિ ॥ ૧૨॥

તદ્બિલાધસ્તલાત્પ્રોક્તં સુતલાખ્યં બિલેશ્વરમ્ ।
પુણ્યશ્લોકો બલિર્નામા આસ્તે વૈરોચનિર્મુને ॥ ૧૩॥

મહેન્દ્રસ્ય ચ દેવસ્ય ચિકીર્ષુઃ પ્રિયમુત્તમમ્ ।
ત્રિવિક્રમોઽપિ ભગવાન્ સુતલે બલિમાનયત્ ॥ ૧૪॥

ત્રૈલોક્યલક્ષ્મીમાક્ષિપ્ય સ્થાપિતઃ કિલ દૈત્યરાટ્ ।
ઇન્દ્રાદિષ્વપ્યલબ્ધા યા સા શ્રીસ્તમનુવર્તતે ॥ ૧૫॥

તમેવ દેવદેવેશમારાધયતિ ભક્તિતઃ ।
વ્યપેતસાધ્વસોઽદ્યાપિ વર્તતે સુતલાધિપઃ ॥ ૧૬॥

ભૂમિદાનફલં હ્યેતત્પાત્રભૂતેઽખિલેશ્વરે ।
વર્ણયન્તિ મહાત્માનો નૈતદ્યુક્તં ચ નારદ ॥ ૧૭॥

વાસુદેવે ભગવતિ પુરુષાર્થપ્રદે હરૌ ।
એતદ્દાનફલં વિપ્ર સર્વથા નહિ યુજ્યતે ॥ ૧૮॥

યસ્યૈવ દેવદેવસ્ય નામાપિ વિવશો ગૃણન્ ।
સ્વકીયકર્મબન્ધીયગુણાન્વિધુનુતેઽઞ્જસા ॥ ૧૯॥

યત્ક્લેશબન્ધહાનાય સાઙ્ખ્યયોગાદિસાધનમ્ ।
કુર્વતે યતયો નિત્યં ભગવત્યખિલેશ્વરે ॥ ૨૦॥

ન ચાયં ભગવાનસ્માનનુજગ્રાહ નારદ ।
માયામયં ચ ભોગાનામૈશ્વર્યં વ્યતનોત્પરમ્ ॥ ૨૧॥

સર્વક્લેશાધિહેતું તદાત્માનુસ્મૃતિમોષણમ્ ।
યં સાક્ષાદ્ભગવાન્ વિષ્ણુઃ સર્વોપાયવિદીશ્વરઃ ॥ ૨૨॥

યાઞ્ચાછલેનાપહૃતં સર્વસ્વં દેહશેષકમ્ ।
અપ્રાપ્તાન્યોપાય ઈશઃ પાશૈર્વારુણસમ્ભવૈઃ ॥ ૨૩॥

બન્ધયિત્વાવમુચ્યાપિ ગિરિદર્યામિવાબ્રવીત્ ।
અસાવિન્દ્રો મહામૂઢો યસ્ય મન્ત્રી બૃહસ્પતિઃ ॥ ૨૪॥

પ્રસન્નમિમમત્યર્થમયાચલ્લોકસમ્પદમ્ ।

ત્રૈલોક્યમિદમૈશ્વર્યં કિયદેવાતિતુચ્છકમ્ ॥ ૨૫॥

આશિષાં પ્રભવં મુક્ત્વા યો મૂઢો લોકસમ્પદિ ।
અસ્મત્પિતામહઃ શ્રીમાન્ પ્રહ્લાદો ભગવત્પ્રિયઃ ॥ ૨૬॥

દાસ્યં વવ્રે વિભોસ્તસ્ય સર્વલોકોપકારકઃ ।
પિત્ર્યમૈશ્વર્યમતુલં દીયમાનં ચ વિષ્ણુના ॥ ૨૭॥

પિતર્યુપરતે વીરે નૈવૈચ્છદ્ભગવત્પ્રિયઃ ।
તસ્યાતુલાનુભાવસ્ય સર્વલોકોપધીમતઃ ॥ ૨૮॥

અસ્મદ્વિધો નાલ્પપક્વેતરદોષોઽવગચ્છતિ ।
એવં દૈત્યપતિઃ સોઽયં બલિઃ પરમપૂજિતઃ ॥ ૨૯॥

સુતલે વર્તતે યસ્ય દ્વારપાલો હરિઃ સ્વયમ્ ।
એકદા દિગ્વિજયે રાજા રાવણો લોકરાવણઃ ॥ ૩૦॥

પ્રવિશન્સુતલે યેન ભક્તાનુગ્રહકારિણા ।
પાદાઙ્ગુષ્ઠેન પ્રક્ષિપ્તો યોજનાયુતમત્ર હિ ॥ ૩૧॥

એવમ્ભૂતાનુભાવોઽયં બલિઃ સર્વસુખૈકભુક્ ।
આસ્તે સુતલરાજસ્થો દેવદેવપ્રસાદતઃ ॥ ૩૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
અતલવિતલસુતલલોકવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૮.૧૯॥

## ૮.૨૦ વિંશોઽધ્યાયઃ । તલાતલાદિલોકવર્ણનેઽનન્તવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
તતોઽધસ્તાદ્વિવરકં તલાતલમુદીરિતમ્ ।
દાનવેન્દ્રો મયો નામ ત્રિપુરાધિપતિર્મહાન્ ॥ ૧॥

ત્રિલોક્યાઃ શઙ્કરેણાયં પાલિતો દગ્ધપૂસ્ત્રયઃ ।
દેવદેવપ્રસાદાત્તુ લબ્ધરાજ્યસુખાસ્પદઃ ॥ ૨॥

આચાર્યો માયિનાં સોઽયં નાનામાયાવિશારદઃ ।
પૂજ્યતે રાક્ષસૈર્ઘોરૈઃ સર્વકાર્યસમૃદ્ધયે ॥ ૩॥

તતોઽધસ્તાસ્તુવિખ્યાતં મહાતલમિતિ સ્ફુટમ્ ।
સર્પાણાં કાદ્રવેયાણાં ગણઃ ક્રોધવશો મહાન્ ॥ ૪॥

અનેકશિરસાં વિપ્ર પ્રધાનાન્કીર્તયામિ તે ।
કુહકસ્તક્ષકશ્ચૈવ સુષેણઃ કાલિયસ્તથા ॥ ૫॥

મહાભોગા મહાસત્ત્વાઃ ક્રૂરાઃ ક્રૂરસ્વજાતયઃ ।
પતત્રિરાજાધિપતેરુદ્વિગ્નાઃ સર્વ એવ તે ॥ ૬॥

સ્વકલત્રાપત્યસુહૃત્કુટુમ્બસ્ય ચ સઙ્ગતાઃ ।
પ્રમત્તા વિહરન્ત્યેવ નાનાક્રીડાવિશારદાઃ ॥ ૭॥

તતોઽધસ્તાચ્ચ વિવરે રસાતલસમાહ્વયે ।
દૈતેયા નિવસન્ત્યેવ પણયો દાનવાશ્ચ યે ॥ ૮॥

નિવાતકવચા નામ હિરણ્યપુરવાસિનઃ ।
કાલેયા ઇતિ ચ પ્રોક્તાઃ પ્રત્યનીકા હવિર્ભુજામ્ ॥ ૯॥

મહૌજસશ્ચોત્પત્ત્યૈવ મહાસાહસિનસ્તથા ।
સકલેશસ્ય ચ હરેસ્તેજસા હતવિક્રમાઃ ॥ ૧૦॥

બિલેશયા ઇવ સદા વિવરે નિવસન્તિ હિ ।
યે વૈ વાગ્ભિઃ સરમયા શક્રદૂત્યા નિરન્તરમ્ ॥ ૧૧॥

મન્ત્રવર્ણાભિરસુરાસ્તાડિતા બિભ્યતિ સ્મ હ ।
તતોઽપ્યધસ્તાત્પાતાલે નાગલોકાધિપાલકાઃ ॥ ૧૨॥

વાસુકિપ્રમુખાઃ શઙ્ખઃ કુલિકઃ શ્વેત એવ ચ ।
ધનઞ્જયો મહાશઙ્ખો ધૃતરાષ્ટ્રસ્તથૈવ ચ ॥ ૧૩॥

શઙ્ખચૂડઃ કમ્બલાશ્વતરો દેવોપદત્તકઃ ।
મહામર્ષા મહાભોગા નિવસન્તિ વિષોલ્બણાઃ ॥ ૧૪॥

પઞ્ચમસ્તકવન્તશ્ચ ફણાસપ્તકભૂષિતાઃ ।
કેચિદ્દશફણાઃ કેચિચ્છતશીર્ષાસ્તથાપરે ॥ ૧૫॥

સહસ્રશિરસઃ કેઽપિ રોચિષ્ણુમણિધારકાઃ ।
પાતાલરન્ધ્રતિમિરનિકરં સ્વમરીચિભિઃ ॥ ૧૬॥

વિધમન્તિ ચ દેવર્ષે સદા સઞ્જાતમન્યવઃ ।
અસ્ય મૂલપ્રદેશે હિ ત્રિંશત્સાહસ્રકેઽન્તરે ॥ ૧૭॥

યોજનૈઃ પરિસઙ્ખ્યાતે તામસી ભગવત્કલા ।

અનન્તાખ્યા સમાસ્તે હિ સર્વદેવપ્રપૂજિતા ॥ ૧૮॥

અહમિત્યભિમાનસ્ય લક્ષણં યં પ્રચક્ષતે ।
સઙ્કર્ષણં સાત્વતીયાઃ કર્ષણં દ્રષ્ટૃદૃશ્યયોઃ ॥ ૧૯॥

ઇદં ભૂમણ્ડલં યસ્ય સહસ્રશિરસઃ પ્રભોઃ ।
અનન્તમૂર્તેઃ શેષસ્ય ધ્રિયમાણં ચ શીર્ષકે ॥ ૨૦॥

પૃથ્વીગોલમશેષં હિ સિદ્ધાર્થ ઇવ લક્ષ્યતે ।
યસ્ય કાલેન દેવસ્ય સઞ્જિહીર્ષોઃ સમં વિભોઃ ॥ ૨૧॥

ચરાચરં ભ્રુવોરન્તર્વિવરાદુદપદ્યત ।
સાઙ્કર્ષણો નામ રુદ્રો વ્યૂહૈકાદશશોભિતઃ ॥ ૨૨॥

ત્રિલોચનશ્ચ ત્રિશિખં શૂલમુત્તમ્ભયન્સ્વયમ્ ।
ઉદતિષ્ઠન્મહાસત્ત્વો મહાભૂતક્ષયઙ્કરઃ ॥ ૨૩॥

યસ્યાઙ્ઘ્રિકમલદ્વન્દ્વશોણાચ્છનખમણ્ડલે ।
વિરાજન્મણિબિમ્બેષુ મહાહિપતયોઽનિશમ્ ॥ ૨૪॥

એકાન્તભક્તિયોગેન સહ સાત્ત્વતપુઙ્ગવૈઃ ।
પ્રણમન્તઃ સ્વમૂર્ધ્ના તે સ્વમુખાનિ સમીક્ષતે ॥ ૨૫॥

સ્ફુરત્કુણ્ડલમાણિક્યપ્રભામણ્ડલભાઞ્જ્યપિ ।
સુકપોલાનિ ચારૂણિ ગણ્ડસ્થલદ્યુમન્તિ ચ ॥ ૨૬॥

નાગરાજકુમાર્યોઽપિ ચાર્વઙ્ગવિલસત્ત્વિષઃ ।
વિશદૈર્વિપુલૈસ્તદ્વદ્ધવલૈઃ સુભગૈસ્તથા ॥ ૨૭॥

રુચિરૈર્ભુજદણ્ડૈશ્ચ શોભમાના ઇતસ્તતઃ ।
ચન્દનાગુરુકાશ્મીરપઙ્કલેપેન ભૂષિતાઃ ॥ ૨૮॥

તદભિમર્ષસઞ્જાતકામાવેશસમાયુતાઃ ।
લલિતસ્મિતસંયુક્તાઃ સવ્રીડં લોકયન્તિ ચ ॥ ૨૯॥

અનુરાગમદોન્મત્તવિઘૂર્ણારુણલોચનમ્ ।
કરુણાવલોકનેત્રં ચ આશાસાનાસ્તથાશિષઃ ॥ ૩૦॥

સોઽનન્તો ભગવાન્દેવોઽનન્તસત્ત્વો મહાશયઃ ।
અનન્તગુણવાર્ધિશ્ચ આદિદેવો મહાદ્યુતિઃ ॥ ૩૧॥

સંહૃતામર્ષરોષાદિવેગો લોકશુભાય ચ ।
આસ્તે મહાસત્ત્વનિધિઃ સર્વદેવપ્રપૂજિતઃ ॥ ૩૨॥

ધ્યાયમાનઃ સુરૈઃ સિદ્ધૈરસુરૈશ્ચોરગૈસ્તથા ।
વિદ્યાધરૈશ્ચ ગન્ધર્વૈર્મુનિસઙ્ઘૈશ્ચ નિત્યશઃ ॥ ૩૩॥

અનારતમદોન્મત્તલોકવિહ્વલલોચનઃ ।
વાક્યામૃતેન વિબુધાન્સ્વપાર્ષદગણાનપિ ॥ ૩૪॥

આપ્યાયમાનઃ સ વિભુર્વૈજયન્તીં સ્રજં દધત્ ।
અમ્લાનાભિનવૈઃ સ્વચ્છૈસ્તુલસીદલસઞ્ચયૈઃ ॥ ૩૫॥

માદ્યન્મધુકરવ્રાતઘોષશ્રીસંયુતાં સદા ।
નીલવાસા દેવદેવ એકકુણ્ડલભૂષિતઃ ॥ ૩૬॥

હલસ્ય કકુદિ ન્યસ્તસુપીવરભુજોઽવ્યયઃ ।
મહેન્દ્રઃ કાઞ્ચનીં યદ્વદ્વરત્રાં ચ મતઙ્ગમઃ ।
ઉદારલીલો દેવેશો વર્ણિતઃ સાત્ત્વતર્ષભૈઃ ॥ ૩૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
તલાતલાદિલોકવર્ણનેઽનન્તવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૮.૨૦॥

## ૮.૨૧ એકવિંશોઽધ્યાયઃ । નરકસ્વરૂપવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
તસ્યાનુભાવં ભગવાન્ બ્રહ્મપુત્રઃ સનાતનઃ ।
સભાયાં બ્રહ્મદેવસ્ય ગાયમાન ઉપાસતે ॥ ૧॥

ઉત્પત્તિસ્થિતિલયહેતવોઽસ્ય કલ્પાઃ
સત્ત્વાદ્યાઃ પ્રકૃતિગુણા યદીક્ષયાઽઽસન્ ।
યદ્રૂપં ધ્રુવમકૃતં યદેકમાત્મન્-
નાનાધાત્કથમુહ વેદ તસ્ય વર્ત્મ ॥ ૨॥

મૂર્તિં નઃ પુરુકૃપયા બભાર સત્ત્વં
સંશુદ્ધં સદસદિદં વિભાતિ યત્ર ।
યલ્લીલાં મૃગપતિરાદદેઽનવદ્યા-
માદાતું સ્વજનમનાંસ્યુદારવીર્યઃ ॥ ૩॥

યન્નામ શ્રુતમનુકીર્તયેદકસ્મા-
દાર્તો વા યદિ પતિતઃ પ્રલમ્ભનાદ્વા ।
હન્ત્યંહઃ સપદિ નૃણામશેષમન્યં
કં શેષાદ્ભગવત આશ્રયેત્મુમુક્ષુઃ ॥ ૪॥

મૂર્ધન્યર્પિતમણુવત્સહસ્રમૂર્ધ્નો
ભૂગોલં સગિરિસરિત્સમુદ્રસત્ત્વમ્ ।
આનન્ત્યાદનમિતવિક્રમસ્ય ભૂમ્નઃ
કો વીર્યાણ્યધિગણયેત્સહસ્રજિહ્વઃ ॥ ૫॥

એવમ્પ્રભાવો ભગવાનનન્તો
દુરન્તવીર્યોરુગુણાનુભાવઃ ।
મૂલે રસાયાઃ સ્થિત આત્મતન્ત્રો
યો લીલયા ક્ષ્માં સ્થિતયે બિભર્તિ ॥ ૬॥

એતા હ્યેવેહ તુ નૃભિર્ગતયો મુનિસત્તમ ।
ગન્તવ્યા બહુશો યદ્વદ્યથાકર્મવિનિર્મિતાઃ ॥ ૭॥

યથોપદેશં ચ કામાન્સદા કામયમાનકૈઃ ।
એતાવતીર્હિ રાજેન્દ્ર મનુષ્યમૃગપક્ષિષુ ॥ ૮॥

વિપાકગતયઃ પ્રોક્તા ધર્મસ્ય વશગાસ્તથા ।
ઉચ્ચાવચા વિસદૃશા યથાપ્રશ્નં નિબોધત ॥ ૯॥

નારદ ઉવાચ ।
વૈચિત્ર્યમેતલ્લોકસ્ય કથં ભગવતા કૃતમ્ ।
સમાનત્વે કર્મણાં ચ તન્નો બ્રૂહિ યથાતથમ્ ॥ ૧૦॥

શ્રીનારાયણ ઉવાચ ।
કર્તુઃ શ્રદ્ધાવશાદેવ ગતયોઽપિ પૃથગ્વિધાઃ ।
ત્રિગુણત્વાત્સદા તાસાં ફલં વિસદૃશં ત્વિહ ॥ ૧૧॥

સાત્ત્વિક્યા શ્રદ્ધયા કર્તુઃ સુખિત્વં જાયતે સદા ।
દુઃખિત્વં ચ તથા કર્તૂ રાજસ્યા શ્રદ્ધયા ભવેત્ ॥ ૧૨॥

દુઃખિત્વં ચૈવ મૂઢત્વં તામસ્યા શ્રદ્ધયોદિતમ્ ।
તારતમ્યાત્તુ શ્રદ્ધાનાં ફલવૈચિત્ર્યમીરિતમ્ ॥ ૧૩॥

અનાદ્યવિદ્યાવિહિતકર્મણાં પરિણામજાઃ ।

સહસ્રશઃ પ્રવૃત્તાસ્તુ ગતયો દ્વિજપુઙ્ગવ ॥ ૧૪॥

તદ્ભેદાન્વર્ણયિષ્યામિ પ્રાચુર્યેણ દ્વિજોત્તમ ।
ત્રિજગત્યા અન્તરાલે દક્ષિણસ્યાં દિશીહ વૈ ॥ ૧૫॥

ભૂમેરધસ્તાદુપરિ ત્વતલસ્ય ચ નારદ ।
અગ્નિષ્વાત્તાઃ પિતૃગણા વર્તન્તે પિતરશ્ચ હ ॥ ૧૬॥

વસન્તિ યસ્યાં સ્વીયાનાં ગોત્રાણાં પરમાશિષઃ ।
સત્યાઃ સમાધિના શીઘ્રં ત્વાશાસાનાઃ પરેણ વૈ ॥ ૧૭॥

પિતૃરાજોઽપિ ભગવાન્ સમ્પરેતેષુ જન્તુષુ ।
વિષયં પ્રાપિતેષ્વેષુ સ્વકીયૈઃ પુરુષૈરિહ ॥ ૧૮॥

સગણો ભગવત્પ્રોક્તાજ્ઞાપરો દમધારકઃ ।
યથાકર્મ યથાદોષં વિદધાતિ વિચારદૃક્ ॥ ૧૯॥

સ્વાન્ગણાન્ધર્મતત્ત્વજ્ઞાન્સર્વાનાજ્ઞાપ્રવર્તકાન્ ।
સદા પ્રેરયતિ પ્રાજ્ઞો યથાદેશનિયોજિતાન્ ॥ ૨૦॥

નરકાનેકવિંશત્યા સઙ્ખ્યયા વર્ણયન્તિ હિ ।
અષ્ટાવિંશમિતાન્કેચિત્તાનનુક્રમતો બ્રુવે ॥ ૨૧॥

તામિસ્ર અન્ધતામિસ્રો રૌરવોઽપિ તૃતીયકઃ ।
મહારૌરવનામા ચ કુમ્ભીપાકોઽપરો મતઃ ॥ ૨૨॥

કાલસૂત્રં તથા ચાસિપત્રારણ્યમુદાહૃતમ્ ।
સૂકરસ્ય મુખં ચાન્ધકૂપોઽથ કૃમિભોજનઃ ॥ ૨૩॥

સન્દંશસ્તપ્તમૂર્તિશ્ચ વજ્રકણ્ટક એવ ચ ।
શાલ્મલી ચાથ દેવર્ષે નામ્ના વૈરતણી તથા ॥ ૨૪॥

પૂયોદઃ પ્રાણરોધશ્ચ તથા વિશસનં મતમ્ ।
લાલાભક્ષઃ સારમેયાદનમુક્તમતઃ પરમ્ ॥ ૨૫॥

અવીચિરપ્યયઃ પાનં ક્ષારકર્દમ એવ ચ ।
રક્ષોગણાખ્યસમ્ભોજઃ શૂલપ્રોતોઽપ્યતઃ પરમ્ ॥ ૨૬॥

દન્દશૂકોઽવટારોધઃ પર્યાવર્તનકઃ પરમ્ ।
સૂચીમુખમિતિ પ્રોક્તા અષ્ટાવિંશતિનારકાઃ ॥ ૨૭॥

ઇત્યેતે નારકા નામ યાતનાભૂમયઃ પરાઃ ।
કર્મભિશ્ચાપિ ભૂતાનાં ગમ્યાઃ પદ્મજસમ્ભવ ॥ ૨૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
નરકસ્વરૂપવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૮.૨૧॥

## ૮.૨૨ દ્વાવિંશોઽધ્યાયઃ । નરકપ્રદપાતકવર્ણનમ્ ।

નારદ ઉવાચ ।
કર્મભેદાઃ કતિવિધાઃ સનાતનમુને મમ ।
શ્રોતવ્યાઃ સર્વથૈવૈતે યાતનાપ્રાપ્તિભૂમયઃ ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
યો વૈ પરસ્ય વિત્તાનિ દારાપત્યાનિ ચૈવ હિ ।
હરતે સ હિ દુષ્ટાત્મા યમાનુચરગોચરઃ ॥ ૨॥

કાલપાશેન સમ્બદ્ધો યામ્યૈરતિભયાનકૈઃ ।
તામિસ્રનામનરકે પાત્યતે યાતનાસ્પદે ॥ ૩॥

તાડનં દણ્ડનં ચૈવ સન્તર્જનમતઃ પરમ્ ।
યામ્યાઃ કુર્વન્તિ પાશાઢ્યાઃ કશ્મલં યાતિ ચૈવ હિ ॥ ૪॥

મૂર્ચ્છામાયાતિ વિવશો નારકી પદ્મભૂસુત ।
યઃ પતિં વઞ્ચયિત્વા તુ દારાદીનુપભુઞ્જયતિ ॥ ૫॥

અન્ધતામિસ્રનરકે પાત્યતે યમકિઙ્કરૈઃ ।
પાત્યમાનો યત્ર જન્તુર્વેદનાપરવાન્ભવેત્ ॥ ૬॥

નષ્ટદૃષ્ટિર્નષ્ટમતિર્ભવત્યેવાવિલમ્બતઃ ।
વનસ્પતિર્ભજ્યમાનમૂલો યદ્વદ્ભવેદિહ ॥ ૭॥

તસ્માદપ્યન્ધતામિસ્રનામ્ના પ્રોક્તઃ પુરાતનૈઃ ।
એતન્મમાહમિતિ યો ભૂતદ્રોહેણ કેવલમ્ ॥ ૮॥

પુષ્ણાતિ પ્રત્યહં સ્વીયં કુટુમ્બં કાર્યલમ્પટઃ ।
એતદ્વિહાય ચાત્રૈવ સ્વાશુભેન પતેદિહ ॥ ૯॥

રૌરવે નામ નરકે સર્વસત્ત્વભયાવહે ।
ઇહ લોકેઽમુના યે તુ હિંસિતા જન્તવઃ પુરા ॥ ૧૦॥

ત એવ રુરવો ભૂત્વા પરત્ર પીડયન્તિ તમ્ ।
તસ્માદ્રૌરવમિત્યાહુઃ પુરાણજ્ઞા મનીષિણઃ ॥ ૧૧॥

રુરુઃ સર્પાદતિક્રૂરો જન્તુરુક્તઃ પુરાતનૈઃ ।
એવં મહારૌરવાખ્યો નરકો યત્ર પૂરુષઃ ॥ ૧૨॥

યાતનાં પ્રાપ્યમાણો હિ યઃ પરં દેહસમ્ભવઃ ।
ક્રવ્યાદા નામ રુરવસ્તં ક્રવ્યે ઘાતયન્તિ ચ ॥ ૧૩॥

ય ઉગ્રઃ પુરુષઃ ક્રૂરઃ પશુપક્ષિગણાનપિ ।
ઉપરન્ધયતે મૂઢો યામ્યાસ્તં રન્ધયન્તિ ચ ॥ ૧૪॥

કુમ્ભીપાકે તપ્તતૈલે ઉપર્યપિ ચ નારદ ।
યાવન્તિ પશુરોમાણિ તાવદ્વર્ષસહસ્રકમ્ ॥ ૧૫॥

પિતૃવિપ્રબ્રાહ્મણધ્રુક્કાલસૂત્રે સ નારકે ।
અગ્ન્યર્કાભ્યાં તપ્યમાને નારકી વિનિવેશિતઃ ॥ ૧૬॥

ક્ષુત્પિપાસાદહ્યમાનોઽન્તઃશરીરસ્તથા બહિઃ ।
આસ્તે શેતે ચેષ્ટતે ચાવતિષ્ઠતિ ચ ધાવતિ ॥ ૧૭॥

નિજવેદપથાદ્યો વૈ પાખણ્ડં ચોપયાતિ ચ ।
અનાપદ્યપિ દેવર્ષે તં પાપં પુરુષં ભટાઃ ॥ ૧૮॥

અસિપત્રવનં નામ નરકં વેશયન્તિ ચ ।
કશયા પ્રહરન્ત્યેવ નારકી તદ્ગતસ્તદા ॥ ૧૯॥

ઇતસ્તતો ધાવમાન ઉત્તાલમતિવેગતઃ ।
અસિપત્રૈશ્છિદ્યમાન ઉભયત્ર ચ ધારભિઃ ॥ ૨૦॥

સઞ્છિદ્યમાનસર્વાઙ્ગો હાહતોઽસ્મીતિ મૂર્ચ્છિતઃ ।
વેદનાં પરમાં પ્રાપ્તઃ પતત્યેવ પદે પદે ॥ ૨૧॥

સ્વધર્માનુગતં ભુઙ્ક્તે પાખણ્ડફલમલ્પધીઃ ।
યો રાજા રાજપુરુષો દણ્ડયેદ્વૈ ત્વધર્મતઃ ॥ ૨૨॥

દ્વિજે શરીરદણ્ડં ચ પાપીયાન્નારકી ચ સઃ ।
નરકે સૂકરમુખે પાત્યતે યમકિઙ્કરૈઃ ॥ ૨૩॥

વિનિષ્પિષ્ટાવયવકો બલવદ્ભિસ્તથેક્ષુવત્ ।
આર્તસ્વરેણ સ્વનયન્મૂર્ચ્છિતઃ કશ્મલઙ્ગતઃ ॥ ૨૪॥

સ પીડ્યમાનો બહુધા વેદનાં યાત્યતીવ હિ ।
વિવિક્તપરપીડો યોઽપ્યવિવિક્તપરવ્યથામ્ ॥ ૨૫॥

ઈશ્વરાઙ્કિતવૃત્તીનાં વ્યથામાચરતે સ્વયમ્ ।
સ ચાન્ધકૂપે પતતિ તદભિદ્રોહયન્ત્રિતે ॥ ૨૬॥

તત્રાસૌ જન્તુભિઃ ક્રૂરૈઃ પશુભિર્મૃગપક્ષિભિઃ ।
સરીસૃપૈશ્ચ મશકૈર્યૂકામત્કુણજાતિભિઃ ॥ ૨૭॥

મક્ષિકાભિશ્ચ તમસિ દન્દશૂકૈશ્ચ પીડ્યતે ।
પરિક્રામતિ ચૈવાત્ર કુશરીરે ચ જન્તુવત્ ॥ ૨૮॥

યસ્તુ સંવિહિતૈઃ પઞ્ચયજ્ઞૈઃ કાકૈશ્ચ સંસ્તુતઃ ।
અશ્નાતિ ચાસંવિભજ્ય યત્કિઞ્ચિદુપપદ્યતે ॥ ૨૯॥

સ પાપપુરુષઃ ક્રૂરૈર્યામ્યૈશ્ચ કૃમિભોજને ।
નરકાધમકે દુષ્ટકર્મણા પરિપાત્યતે ॥ ૩૦॥

લક્ષયોજનવિસ્તીર્ણે કૃમિકુણ્ડે ભયઙ્કરે ।
કૃમિરૂપં સમાસાદ્ય ભક્ષ્યમાણશ્ચ તૈઃ સ્વયમ્ ॥ ૩૧॥

અપ્રત્તાપ્રહુતાદો યઃ પાતમાપ્નોતિ તત્ર વૈ ।
યસ્તુ સ્તેયેન ચ બલાદ્ધિરણ્યં રત્નમેવ ચ ॥ ૩૨॥

બ્રાહ્મણસ્યાપહરતિ અન્યસ્યાપિ ચ કસ્યચિત્ ।
અનાપદિ ચ દેવર્ષે તમમુત્ર યમાનુગાઃ ॥ ૩૩॥

અયસ્મયૈરગ્નિપિણ્ડૈઃ સદૃશૈર્નિત્કુષન્તિ ચ ।
યોઽગમ્યાં યોષિતં ગચ્છેદગમ્યં પુરુષં ચ યા ॥ ૩૪॥

તાવમુત્રાપિ કશયા તાડયન્તો યમાનુગાઃ ।
તિગ્મયા લોહમય્યા ચ સૂર્મ્યાપ્યાલિઙ્ગયન્તિ તમ્ ॥ ૩૫॥

તાં ચાપિ યોષિતં સૂર્મ્યાલિઙ્ગયન્તિ યમાનુગાઃ ।
યસ્તુ સર્વાભિગમનઃ પુરુષઃ પાપસઞ્ચયી ॥ ૩૬॥

નિરયેઽમુત્ર તં યામ્યાઃ શાલ્મલીં રોપયન્તિ તમ્ ।
વજ્રકણ્ટકસંયુક્તાં શાલ્મલીં તામયસ્મયીમ્ ॥ ૩૭॥

રાજન્યા રાજપુરુષા યે વા પાખણ્ડવર્તિનઃ ।

ધર્મસેતું વિભિન્દન્તિ તે પરેત્ય ગતા નરાઃ ॥ ૩૮॥

વૈતરણ્યાં પતન્ત્યેવ ભિન્નમર્યાદપાતકાઃ ।
નદ્યાં નિરયદુર્ગસ્ય પરિખાયાં ચ નારદ ॥ ૩૯॥

યાદોગણૈઃ સમન્તાત્તુ ભક્ષ્યમાણા ઇતસ્તતઃ ।
નાત્મના વિયુજન્ત્યેવ નાસુભિશ્ચાપિ નારદ ॥ ૪૦॥

સ્વીયેન કર્મપાકેનોપતપન્તિ ચ સર્વતઃ ।
વિણ્મૂત્રપૂયરક્તૈશ્ચ કેશાસ્થિનખમાંસકૈઃ ॥ ૪૧॥

મેદોવસાસંયુતાયાં નદ્યામુપપતન્તિ તે ।
વૃષલીપતયો યે ચ નષ્ટશૌચા ગતત્રપાઃ ॥ ૪૨॥

આચારનિયમૈસ્ત્યક્તાઃ પશુચર્યાપરાયણાઃ ।
તેઽત્રાનુકષ્ટગતયો વિણ્મૂત્રશ્લેષ્મરક્તકૈઃ ॥ ૪૩॥

શ્લેષ્મમલસમાપૂર્ણે નિપતન્તિ દુરાગ્રહાઃ ।
તદેવ ખાદયન્ત્યેતાન્યમાનુચરવર્ગકાઃ ॥ ૪૪॥

યે શ્વાનગર્દભાદીનાં પતયો વૈ દ્વિજાતયઃ ।
મૃગયારસિકા નિત્યમતીર્થે મૃગઘાતકાઃ ॥ ૪૫॥

પરેતાંસ્તાન્યમભટા લક્ષીભૂતાન્નરાધમાન્ ।
ઇષુભિશ્ચ વિભિન્દન્તિ તાંસ્તાન્દુર્નયમાગતાન્ ॥ ૪૬॥

યે દમ્ભા દમ્ભયજ્ઞેષુ પશૂન્ઘ્નન્તિ નરાધમાઃ ।
તાનમુષ્મિન્યમભટા નરકે વૈશસે તદા ॥ ૪૭॥

નિપાત્ય પીડયન્ત્યેવ કશાઘાતૈર્દુરાસદૈઃ ।
યો ભાર્યાં ચ સવર્ણાં વૈ દ્વિજો મદનમોહિતઃ ॥ ૪૮॥

રેતઃ પાયયતિ મૂઢોઽમુત્ર તં યમકિઙ્કરાઃ ।
રેતઃકુણ્ડે પાતયન્તિ રેતઃ સમ્પાયયન્તિ ચ ॥ ૪૯॥

યે દસ્યવોઽગ્નિદાશ્ચૈવ ગરદા સાર્થઘાતકાઃ ।
ગ્રામાન્સાર્થાન્વિલુમ્પન્તિ રાજાનો રાજપૂરુષાઃ ॥ ૫૦॥

તાન્પરેતાન્યમભટા નયન્તિ શ્વાનકાદનમ્ ।
વિંશત્યધિકસઙ્ખ્યાતાઃ સારમેયા મહાદ્ભુતાઃ ॥ ૫૧॥

સમશત્યા સમાખ્યાતા રભસં ખાદયન્તિ તે ।
સારમેયાદનં નામ નરકં દારુણં મુને ।
અતઃ પરં પ્રવક્ષ્યામિ અવીચિપ્રભુખાન્મુને ॥ ૫૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
નરકપ્રદપાતકવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૮.૨૨॥

## ૮.૨૩ ત્રયોવિંશોઽધ્યાયઃ । અવશિષ્ટનરકવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
યે નરાઃ સર્વદા સાક્ષ્યે અનૃતં ભાષયન્તિ ચ ।
દાને વિનિમયેઽર્થસ્ય દેવર્ષે પાપબુદ્ધયઃ ॥ ૧॥

તે પ્રેત્યામુત્ર નરકે અવીચ્યાખ્યેઽતિદારુણે ।
યોજનાનાં શતોચ્છ્રાયાદ્ગિરિમૂર્ધ્નઃ પતન્તિ હિ ॥ ૨॥

અનાકાશેઽધઃશિરસસ્તદવીચીતિનામકે ।
યત્ર સ્થલં દૃશ્યતે ચ જલવદ્વીચિસંયુતમ્ ॥ ૩॥

અવીચિમત્તતસ્તત્ર તિલશશ્છિન્નવિગ્રહઃ ।
મ્રિયતે નૈવ દેવર્ષે પુનરેવાઽવરોપ્યતે ॥ ૪॥

યો વા દ્વિજો વા રાજન્યો વૈશ્યો વા બ્રહ્મસમ્ભવ ।
સોમપીથસ્તત્કલત્રં સુરાં વા પિબતીવ હિ ॥ ૫॥

પ્રમાદતસ્તુ તેષાં વૈ નિરયે પરિપાતનમ્ ।
કુર્વન્તિ યમદૂતાસ્તે પાનં કાષ્ર્ણાયસો મુને ॥ ૬॥

વહ્નિના દ્રવમાણસ્ય નિતરાં બ્રહ્મસમ્ભવ ।
સમ્ભાવનેન સ્વસ્યૈવ યોઽધમોઽપિ નરાધમઃ ॥ ૭॥

વિદ્યાજન્મતપોવર્ણાશ્રમાચારવતો નરાન્ ।
વરીયસોઽપિ ન બહુ મન્યતે પુરુષાધમઃ ॥ ૮॥

સ નીયતે યમભટૈઃ ક્ષારકર્દમનામકે ।
નિરયેઽર્વાક્શિરા ઘોરા દુરન્તયાતનાશ્નુતે ॥ ૯॥

યે વૈ નરા યજન્ત્યન્યં નરમેધેન મોહિતાઃ ।
સ્ત્રિયોઽપિ વા નરપશું ખાદન્ત્યત્ર મહામુને ॥ ૧૦॥

પશવો નિહિતાસ્તે તુ યમસદ્મનિ સઙ્ગતાઃ ।
સૌનિકા ઇવ તે સર્વે વિદાર્ય શિતધારયા ॥ ૧૧॥

અસૃક્પિબન્તિ નૃત્યન્તિ ગાયન્તિ બહુધા મુને ।
યથેહ માંસભોક્તારઃ પુરુષાદા દુરાસદાઃ ॥ ૧૨॥

અનાગસોઽપિ યેઽરણ્યે ગ્રામે વા બ્રહ્મપુત્રક ।
વૈશ્રમ્ભકૈરુપસૃતાન્વિશ્રમ્ભય્યજિજીવિષૂન્ ॥ ૧૩॥

શૂલસૂત્રાદિષુ પ્રોતાન્ક્રીડનોત્કારકાનિવ ।
પાતયન્તિ ચ તે પ્રેત્ય શૂલપાતે પતન્તિ હ ॥ ૧૪॥

શૂલાદિષુ પ્રોતદેહાઃ ક્ષુત્તૃડ્ભ્યાં ચાતિપીડિતાઃ ।
તિગ્મતુણ્ડૈઃ કઙ્કબકૈરિતશ્ચેતશ્ચ તાડિતાઃ ॥ ૧૫॥

પીડિતા આત્મશમલં બહુધા સંસ્મરન્તિ હિ ।
યે ભૂતાનુદ્વેજયન્તિ નરા ઉલ્બણવૃત્તયઃ ॥ ૧૬॥

યથા સર્પાદિકાસ્તેઽપિ નરકે નિપતન્તિ હિ ।
દન્દશૂકાભિધાને ચ યત્રોત્તિષ્ઠન્તિ સર્વતઃ ॥ ૧૭॥

પઞ્ચાનનઃ સપ્તમુખા ગ્રસન્તિ નરકાગતાન્ ।
યથા બિલેશયા વિપ્ર ક્રૂરબુદ્ધિસમન્વિતાઃ ॥ ૧૮॥

યેઽવટેષુ કુસૂલાદિગુહાદિષુ નિરુન્ધતે ।
તાનમુત્રોદ્યતકરાઃ કીનાશપરિસેવકાઃ ॥ ૧૯
તેષ્વેવોપવિશિત્વા ચ સગરેણ ચ વહ્નિના ।
ધૂમેન ચ નિરુન્ધન્તિ પાપકર્મરતાન્નરાન્ ॥ ૨૦॥

યોઽતિથીન્સમયપ્રાપ્તાન્દિધક્ષુરિવ ચક્ષુષા ।
પાપેનેહાલોકયેચ્ચ સ્વયં ગૃહપતિર્દ્વિજઃ ॥ ૨૧॥

તસ્યાપિ પાપદૃષ્ટેર્હિ નિરયે યમકિઙ્કરાઃ ।
અક્ષિણી વજ્રતુણ્ડા યે કઙ્કાઃ કાકવટાદયઃ ॥ ૨૨॥

ગૃધ્રાઃ ક્રૂરતરાશ્ચાપિ પ્રસહ્યોત્પાટયન્તિ હિ ।
ય આઢ્યાભિમતિર્યાતિ અહઙ્કૃત્યાતિગર્વિતઃ ॥ ૨૩॥

તિર્યક્પ્રેક્ષણ એવાત્રાભિવિશઙ્કી નરાધમઃ ।
ચિન્તયાર્થસ્ય સર્વત્રાયતિવ્યયસ્વરૂપયા ॥ ૨૪॥

શુષ્યદ્ધૃદયવક્ત્રશ્ચ નિર્વૃતિં નૈવ ગચ્છતિ ।
ગ્રહવદ્રક્ષતે ચાર્થં સ પ્રેતો યમકિઙ્કરૈઃ ॥ ૨૫॥

સૂચીમુખે ચ નરકે પાત્યતે નિજકર્મણા ।
વિત્તગ્રહં ચ પુરુષં વાયકા ઇવ યામ્યકાઃ ॥ ૨૬॥

કિઙ્કરાઃ સર્વતોઽઙ્ગેષુ સૂત્રૈઃ પરિવયન્તિ હિ ।
એતે બહુવિધા વિપ્ર નરકાઃ પાપકર્મણામ્ ॥ ૨૭॥

નરાણાં શતશઃ સન્તિ યાતનાસ્થાનભૂમયઃ ।
સહસ્રશોઽપિ દેવર્ષે ઉક્તાનુક્તાંસ્તથાપિ હિ ॥ ૨૮॥

વિશન્તિ નરકાનેતાન્યાતનાબહુલાન્મુને ।
તથા ધર્મપરાશ્ચાપિ લોકાન્યાન્તિ સુખોદ્ધતાન્ ॥ ૨૯॥

સ્વધર્મો બહુધા ગીતો યથા તવ મહામુને ।
દેવીપૂજનરૂપો હિ દેવ્યારાધનલક્ષણઃ ॥ ૩૦॥

યેનાનુષ્ઠિતમાત્રેણ નરો ન નરકં વ્રજેત્ ।
સા દેવી ભવપાથોધેરુદ્ધર્ત્રી પૂજિતા નૃણામ્ ॥ ૩૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
ઽવશિષ્ટનરકવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૮.૨૩॥

## ૮.૨૪ ચતુર્વિંશોઽધ્યાયઃ । દેવીપૂજનવિધિનિરૂપણમ્ ।

નારદ ઉવાચ ।
ધર્મશ્ચ કીદૃશસ્તાત દેવ્યારાધનલક્ષણઃ ।
કથમારાધિતા દેવી સા દદાતિ પરં પદમ્ ॥ ૧॥

આરાધનવિધિઃ કો વા કથમારાધિતા કદા ।
કેન સા દુર્ગનરકાદ્દુર્ગા ત્રાણપ્રદા ભવેત્ ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
દેવર્ષે શ઼ૃણુ ચિત્તૈકાગ્ર્યેણ મે વિદુષાં વર ।
યથા પ્રસીદતે દેવી ધર્મારાધનતઃ સ્વયમ્ ॥ ૩॥

સ્વધર્મો યાદૃશઃ પ્રોક્તસ્તં ચ મે શ઼ૃણુ નારદ ।
અનાદાવિહ સંસારે દેવી સશ઼ૃજિતા સ્વયમ્ ॥ ૪॥

પરિપાલયતે ઘોરસઙ્કટાદિષુ સા મુને ।
સા દેવી પૂજ્યતે લોકૈર્યથાવત્તદ્વિધિં શ઼ૃણુ ॥ ૫॥

પ્રતિપત્તિથિમાસાદ્ય દેવીમાજ્યેન પૂજયેત્ ।
ઘૃતં દદ્યાદ્ બ્રાહ્મણાય રોગહીનો ભવેત્સદા ॥ ૬॥

દ્વિતીયાયાં શર્કરયા પૂજયેજ્જગદમ્બિકામ્ ।
શર્કરાં પ્રદદેદ્વિપ્રે દીર્ઘાયુર્જાયતે નરઃ ॥ ૭॥

તૃતીયાદિવસે દેવ્યૈ દુગ્ધં પૂજનકર્મણિ ।
ક્ષીરં દત્ત્વા દ્વિજાગ્ર્યાય સર્વદુઃખાતિગો ભવેત્ ॥ ૮॥

ચતુર્થ્યાં પૂજનેઽપૂપા દેયા દેવ્યૈ દ્વિજાય ચ ।
અપૂપા એવ દાતવ્યા ન વિઘ્નૈરભિભૂયતે ॥ ૯॥

પઞ્ચમ્યાં કદલીજાતં ફલં દેવ્યૈ નિવેદયેત્ ।
તદેવ બ્રાહ્મણે દેયં મેધાવાન્પુરુષો ભવેત્ ॥ ૧૦॥

ષષ્ઠીતિથૌ મધુ પ્રોક્તં દેવીપૂજનકર્મણિ ।
બ્રાહ્મણાય ચ દાતવ્યં મધુ કાન્તિર્યતો ભવેત્ ॥ ૧૧॥

સપ્તમ્યાં ગુડનૈવેદ્યં દેવ્યૈ દત્ત્વા દ્વિજાય ચ ।
ગુડં દત્ત્વા શોકહીનો જાયતે દ્વિજસત્તમ ॥ ૧૨॥

નારિકેલમથાષ્ટમ્યાં દેવ્યૈ નૈવેદ્યમર્પયેત્ ।
બ્રાહ્મણાય પ્રદાતવ્યં તાપહીનો ભવેન્નરઃ ॥ ૧૩॥

નવમ્યાં લાજમમ્બાયૈ ચાર્પયિત્વા દ્વિજાય ચ ।
દત્ત્વા સુખાધિકો ભૂયાદિહ લોકે પરત્ર ચ ॥ ૧૪॥

દશમ્યામર્પયિત્વા તુ દેવ્યૈ કૃષ્ણતિલાન્મુને ।
બ્રાહ્મણાય પ્રદત્ત્વા તુ યમલોકાદ્ભયં ન હિ ॥ ૧૫॥

એકાદશ્યાં દધિ તથા દેવ્યૈ ચાર્પયતે તુ યઃ ।
દદાતિ બ્રાહ્મણાયૈતદ્દેવીપ્રિયતમો ભવેત્ ॥ ૧૬॥

દ્વાદશ્યાં પૃથુકાન્દેવ્યૈ દત્ત્વાચાર્યાય યો દદેત્ ।
તાનેવ ચ મુનિશ્રેષ્ઠ સ દેવીપ્રિયતાં વ્રજેત્ ॥ ૧૭॥

ત્રયોદશ્યાં ચ દુર્ગાયૈ ચણકાન્પ્રદદાતિ ચ ।
તાનેવ દત્ત્વા વિપ્રાય પ્રજાસન્તતિમાન્ભવેત્ ॥ ૧૮॥

ચતુર્દશ્યાં ચ દેવર્ષે દેવ્યૈ સક્તૂન્પ્રયચ્છતિ ।
તાનેવ દદ્યાદ્વિપ્રાય શિવસ્ય દયિતો ભવેત્ ॥ ૧૯॥

પાયસં પૂર્ણિમાતિથ્યામપર્ણાયૈ પ્રયચ્છતિ ।
દદાતિ ચ દ્વિજાગ્ર્યાય પિતૄનુદ્ધરતેઽખિલાન્ ॥ ૨૦॥

તત્તિથૌ હવનં પ્રોક્તં દેવીપ્રીત્યૈ મહામુને ।
તત્તત્તિથ્યુક્તવસ્તૂનામશેષારિષ્ટનાશનમ્ ॥ ૨૧॥

રવિવારે પાયસં ચ નૈવેદ્યં પરિકીર્તિતમ્ ।
સોમવારે પયઃ પ્રોક્તં ભૌમે ચ કદલીફલમ્ ॥ ૨૨॥

બુધવારે ચ સમ્પ્રોક્તં નવનીતં નવં દ્વિજ ।
ગુરુવારે શર્કરાં ચ સિતાં ભાર્ગવવાસરે ॥ ૨૩॥

શનિવારે ઘૃતં ગવ્યં નૈવેદ્યં પરિકીર્તિતમ્ ।
સપ્તવિંશતિનક્ષત્રનૈવેદ્યં શ્રૂયતાં મુને ॥ ૨૪॥

ઘૃતં તિલં શર્કરાં ચ દધિ દુગ્ધં કિલાટકમ્ ।
દધિકૂર્ચી મોદકં ચ ફેણિકાં ઘૃતમણ્ડકમ્ ॥ ૨૫॥

કંસારં વટપત્રં ચ ઘૃતપૂરમતઃ પરમ્ ।
વટકં કોકરસકં પૂરણં મધુ સૂરણમ્ ॥ ૨૬॥

ગુડં પૃથુકદ્રાક્ષે ચ ખર્જૂરં ચૈવ ચારકમ્ ।
અપૂપં નવનીતં ચ મુદ્ગં મોદક એવ ચ ॥ ૨૭॥

માતુલિઙ્ગમિતિ પ્રોક્તં ભનૈવેદ્યં ચ નારદ ।
વિષ્કમ્ભાદિષુ યોગેષુ પ્રવક્ષ્યામિ નિવેદનમ્ ॥ ૨૮॥

પદાર્થાનાં કૃતેષ્વેષુ પ્રીણાતિ જગદમ્બિકા ।
ગુડં મધુ ઘૃતં દુગ્ધં દધિ તક્રં ત્વપૂપકમ્ ॥ ૨૯॥

નવનીતં કર્કટીં ચ કૂષ્માણ્ડં ચાપિ મોદકમ્ ।
પનસં કદલં જમ્બુફલમામ્રફલં તિલમ્ ॥ ૩૦॥

નારઙ્ગં દાડિમં ચૈવ બદરીફલમેવ ચ ।
ધાત્રીફલં પાયસઞ્ચ પૃથુકં ચણકં તથા ॥ ૩૧॥

નારિકેલં જમ્ભફલં કસેરું સૂરણં તથા ।

એતાનિ ક્રમશો વિપ્ર નૈવેદ્યાનિ શુભાનિ ચ ॥ ૩૨॥

વિષ્કમ્ભાદિષુ યોગેષુ નિર્ણીતાનિ મનીષિભિઃ ।
અથ નૈવેદ્યમાખ્યાસ્યે કરણાનાં પૃથઙ્મુને ॥ ૩૩॥

કંસારં મણ્ડકં ફેણી મોદકં વટપત્રકમ્ ।
લડ્ડુકં ઘૃતપૂરં ચ તિલં દધિ ઘૃતં મધુ ॥ ૩૪॥

કરણાનામિદં પ્રોક્તં દેવીનૈવેદ્યમાદરાત્ ।
અથાન્યત્સમ્પ્રવક્ષ્યામિ દેવીપ્રીતિકરં પરમ્ ॥ ૩૫॥

વિધાનં નારદમુને શ‍ૃણુ તત્સર્વમાદૃતઃ ।
ચૈત્રશુદ્ધતૃતીયાયાં નરો મધુકવૃક્ષકમ્ ॥ ૩૬॥

પૂજયેત્પઞ્ચ ખાદ્યં ચ નૈવેદ્યમુપકલ્પયેત્ ।
એવં દ્વાદશમાસેષુ તૃતીયાતિથિષુ ક્રમાત્ ॥ ૩૭॥

શુક્લપક્ષે વિધાનેન નૈવેદ્યમભિદધ્મહે ।
વૈશાખમાસે નૈવેદ્યં ગુડયુક્તં ચ નારદ ॥ ૩૮॥

જ્યેષ્ઠમાસે મધુ પ્રોક્તં દેવીપ્રીત્યર્થમેવ તુ ।
આષાઢે નવનીતં ચ મધુકસ્ય નિવેદનમ્ ॥ ૩૯॥

શ્રાવણે દધિ નૈવેદ્યં ભાદ્રમાસે ચ શર્કરા ।
આશ્વિને પાયસં પ્રોક્તં કાર્તિકે પય ઉત્તમમ્ ॥ ૪૦॥

માર્ગે ફેણ્યુત્તમા પ્રોક્તા પૌષે ચ દધિકૂર્ચિકા ।
માઘે માસિ ચ નૈવેદ્યં મૃતં ગવ્યં સમાહરેત્ ॥ ૪૧॥

નારિકેલં ચ નૈવેદ્યં ફાલ્ગુને પરિકીર્તિતમ્ ।
એવં દ્વાદશનૈવેદ્યૈર્માસે ચ ક્રમતોઽર્ચયેત્ ॥ ૪૨॥

મઙ્ગલા વૈષ્ણવી માયા કાલરાત્રિર્દુરત્યયા ।
મહામાયા મતઙ્ગી ચ કાલી કમલવાસિની ॥ ૪૩॥

શિવા સહસ્રચરણા સર્વમઙ્ગલરૂપિણી ।
એભિર્નામપદૈર્દેવીં મધૂકે પરિપૂજયેત્ ॥ ૪૪॥

તતઃ સ્તુવીત દેવેશીં મધૂકસ્થાં મહેશ્વરીમ્ ।
સર્વકામસમૃદ્ધ્યર્થં વ્રતપૂર્ણત્વસિદ્ધયે ॥ ૪૫॥

નમઃ પુષ્કરનેત્રાયૈ જગદ્ધાત્ર્યૈ નમોઽસ્તુ તે ।
માહેશ્વર્યૈ મહાદેવ્યૈ મહામઙ્ગલમૂર્તયે ॥ ૪૬॥

પરમા પાપહન્ત્રી ચ પરમાર્ગપ્રદાયિની ।
પરમેશ્વરી પ્રજોત્પત્તિઃ પરબ્રહ્મસ્વરૂપિણી ॥ ૪૭॥

મદદાત્રી મદોન્મત્તા માનગમ્યા મહોન્નતા ।
મનસ્વિની મુનિધ્યેયા માર્તણ્ડસહચારિણી ॥ ૪૮॥

જય લોકેશ્વરિ પ્રાજ્ઞે પ્રલયામ્બુદસન્નિભે ।
મહામોહવિનાશાર્થં પૂજિતાસિ સુરાસુરૈઃ ॥ ૪૯॥

યમલોકાભાવકર્ત્રી યમપૂજ્યા યમાગ્રજા ।
યમનિગ્રહરૂપા ચ યજનીયે નમો નમઃ ॥ ૫૦॥

સમસ્વભાવા સર્વેશી સર્વસઙ્ગવિવર્જિતા ।
સઙ્ગનાશકરી કામ્યરૂપા કારુણ્યવિગ્રહા ॥ ૫૧॥

કઙ્કાલક્રૂરા કામાક્ષી મીનાક્ષી મર્મભેદિની ।
માધુર્યરૂપશીલા ચ મધુરસ્વરપૂજિતા ॥ ૫૨॥

મહામન્ત્રવતી મન્ત્રગમ્યા મન્ત્રપ્રિયઙ્કરી ।
મનુષ્યમાનસગમા મન્મથારિપ્રિયઙ્કરી ॥ ૫૩॥

અશ્વત્થવટનિમ્બામ્રકપિત્થબદરીગતે ।
પનસાર્કકરીરાદિક્ષીરવૃક્ષસ્વરૂપિણી ॥ ૫૪॥

દુગ્ધવલ્લીનિવાસાર્હે દયનીયે દયાધિકે ।
દાક્ષિણ્યકરુણારૂપે જય સર્વજ્ઞવલ્લભે ॥ ૫૫॥

એવં સ્તવેન દેવેશીં પૂજનાન્તે સ્તુવીત તામ્ ।
વ્રતસ્ય સકલં પુણ્યં લભતે સર્વદા નરઃ ॥ ૫૬॥

નિત્યં યઃ પઠતે સ્તોત્રં દેવીપ્રીતિકરં નરઃ ।
આધિવ્યાધિભયં નાસ્તિ રિપુભીતિર્ન તસ્ય હિ ॥ ૫૭॥

અર્થાર્થી ચાર્થમાપ્નોતિ ધર્માર્થી ધર્મમાપ્નુયાત્ ।
કામાનવાપ્નુયાત્કામી મોક્ષાર્થી મોક્ષમાજપ્નુયાત્ ॥ ૫૮॥

બ્રાહ્મણો વેદસમ્પનો વિજયી ક્ષત્રિયો ભવેત્ ।
વૈશ્યશ્ચ ધનધાન્યાઢ્યો ભવેચ્છૂદ્રઃ સુખાધિકઃ ॥ ૫૯॥

સ્તોત્રમેતચ્છ્રાદ્ધકાલે યઃ પઠેત્પ્રયતો નરઃ ।
પિતૄણામક્ષયા તૃપ્તિર્જાયતે કલ્પવર્તિની ॥ ૬૦॥

એવમારાધનં દેવ્યાઃ સમુક્તં સુરપૂજિતમ્ ।
યઃ કરોતિ નરો ભક્ત્યા સ દેવીલોકભાગ્ભવેત્ ॥ ૬૧॥

દેવીપૂજનતો વિપ્ર સર્વે કામા ભવન્તિ હિ ।
સર્વપાપહતિઃ શુદ્ધા મતિરન્તે પ્રજાયતે ॥ ૬૨॥

યત્ર તત્ર ભવેત્પૂજ્યો માન્યો માનધનેષુ ચ ।
જાયતે જગદમ્બાયાઃ પ્રસાદેન વિરઞ્ચિજ ॥ ૬૩॥

નરકાણાં ન તસ્યાસ્તિ ભયં સ્વપ્નેઽપિ કુત્રચિત્ ।
મહામાયાપ્રસાદેન પુત્રપૌત્રાદિવર્ધનઃ ॥ ૬૪॥

દેવીભક્તો ભવત્યેવ નાત્ર કાર્યા વિચારણા ।
ઇત્યેવં તે સમાખ્યાતં નરકોદ્ધારલક્ષણમ્ ॥ ૬૫॥

પૂજનં હિ મહાદેવ્યાઃ સર્વમઙ્ગલકારકમ્ ।
મધૂકપૂજનં તદ્વન્માસાનાં ક્રમતો મુને ॥ ૬૬॥

સર્વં સમાચરેદ્યસ્તુ પૂજનં મધુકાહ્વયમ્ ।
ન તસ્ય રોગબાધાદિભયમુદ્ભવતેઽનઘ ॥ ૬૭॥

અથાન્યદપિ વક્ષ્યામિ પ્રકૃતેઃ પઞ્ચકં પરમ્ ।
નામ્ના રૂપેણ ચોત્પત્ત્યા જગદાનન્દદાયકમ્ ॥ ૬૮॥

સાખ્યાનં ચ સમાહાત્મ્યં પ્રકૃતેઃ પઞ્ચકં મુને ।
કુતૂહલકર ચૈવ શ‍ૃણુ મુક્તિવિધાયકમ્ ॥ ૬૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામષ્ટમસ્કન્ધે
દેવીપૂજનવિધિનિરૂપણં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૮.૨૪॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે અષ્ટમસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*8 Shrimaddevibhagavatamahapurane Ashtamah Skandhah*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*